प्रवेश सं० ३५०३ विषय: धर्मशास्त्र क्रम सं०

नाम सदाचारप्रशंसा ग्रन्थकार

पत्र सं० १-४८, ४८-~~५०६१~~ ~~६२~~, ५८-७१, ७३-९३

श्लोक सं० अक्षर सं० (पंक्तौ) ३२ पंक्ति सं० (पृष्ठे) ९

आकार: ९.३ × ३.६ लिपि: दे. ना. आधार: का.

वि० विवरणम् अपू०

14126

प्रा. ८९

पी० एस० यू० पा०--७७ एम० सी० ई०--१९५१--५० ००० 

Indira Gandhi National Centre for the Arts

BENARES

Indira Gandhi National
Centre for the Arts

॥श्रीगणेशगुरुगिरिजागिरीशेभ्यो नमो नमः॥ अथ सदाचारप्रशंसाप्रारंभः॥ आचारात्प्राप्यते स्वर्गो
आचारात्प्राप्यते सुखं॥ आचारात्प्राप्यते मोक्ष आचारात्किं न साध्यते॥ मनुः॥ ऋणानि त्रीण्यपाकृत्य
मनो मोक्षे निवेशयेत्॥ अनपाकृत्य तु ऋणं मोक्षमिच्छन्व्रजत्यधः॥ आश्वलायनः॥ अथोच्यते गृह
स्थस्य नित्यकर्म यथाविधि॥ यत्कृत्वानृण्यमाप्नोति देवात्पैत्र्याच्च मानुषात्॥ ब्रह्मचर्येण ऋषिऋणा
न्मुच्यते। दक्षः॥ प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्। यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते
॥ अथ प्रबोधकालः॥ शौनकः॥ ब्राह्मे मुहूर्ते उत्थाय चिंतयेदात्मनो हितं॥ गुरुं विष्णुं नमस्कृत्य मातापि
त्रोस्तथैव च॥ मनुः॥ ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिंतयेत्॥ कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमे
व च॥ वेदतत्त्वार्थः परमात्मा सच्चिदानंदरूपः उपनिषद्गीतादिवेदांतशास्त्रे प्रसिद्धः॥ कूर्मपुराणम्॥
ब्राह्मे मुहूर्ते उत्थाय धर्ममर्थं च चिंतयेत्॥ कायक्लेशं तदुद्भूतं ध्यायीत परमेश्वरं॥ सूर्योदयात्प्राक् यत्
मनसे

---

मुहूर्तद्वयं तन्मध्ये पूर्वो ब्रह्मणो मुहूर्तो ब्राह्मः॥ द्वितीयो मुहूर्तः सूर्यस्य॥ अत्र ब्राह्ममुहूर्ते जागरस्य कारणं॥
स्मृतिरत्नावल्यां॥ ब्राह्मे मुहूर्ते देवानां पितृणां च समागमः॥ जागरस्तत्र कर्तव्यो देवसंमाननं हित
त इत्यादि॥ तद्गृहं देवतैः सार्धं पितृभिः सेव्यते सदा॥ जागराऽकरणे प्रत्यवाय उक्तस्तत्रैव॥ ब्राह्मे
मुहूर्ते सेव्येतां शयनं यत्र दंपती॥ श्मशानतुल्यं तद्गेहं पितृभिः परिवर्जितं॥ प्रत्यूषकाले निद्रां वै
कुरुते सर्वदा तु यः॥ अशुचिं तं विजानीयादनर्हः सर्वकर्मसु॥ तस्य प्रायश्चित्तमुक्तं तत्रैव॥ ब्राह्मे
मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी॥ तां करोति द्विजो मोहात्पादकृच्छ्रेण शुध्यति॥ सूर्योदयसम
ये सूर्यास्तसमये च निद्रानिषेधविस्तरः॥ प्रयोगपारिजाते द्रष्टव्यः॥ अथ प्रातःस्मरणीयं॥ वक्रतु
ण्ड महाकाय कोटिसूर्यसमप्रभ॥ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥१॥ विश्वेशं माधवं धुंडिं दंड
पाणिं च भैरवं॥ वंदे काशीं गुहां गंगां भवानीं मणिकर्णिकां॥२॥ प्रातः स्मरामि दधिघोषविधूतनिद्रं

Indira Gandhi National
Centre for the Arts

॥स्म॰चा॰॥ निशावसानरमणीयमुखारविंदं॥ ध्यानावधानवपुषा नयनाभिरामम् उन्निद्रपद्मनयनं नवनीतचौरं
॥३॥ प्रातः स्मरामि भवभीतिमहार्तिशांत्यै नारायणं गरुडवाहनमब्जनाभं॥ ग्राहाभिभूतवरवारणमुक्ति
॥२॥ हेतुं चक्रायुधं तरुणवारिजपत्रनेत्रं॥४॥ प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविंदयुगलं परम
स्य पुंसः॥ नारायणस्य नरकार्णवतारणस्य नारायणप्रवणविप्रपरायणस्य॥५॥ प्रातर्भजामि भज
तामभयंकरं तं प्राक्सर्वजन्मकृतपापभयापहत्यै॥ योग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणा
शमकरोद्धृतशंखचक्रः॥६॥ श्लोकत्रयमिदं पुण्यं प्रातः प्रातः पठेन्नरः॥ श्लोकत्रयगुरुस्तस्मै दद्या
दात्मपदं हरिः॥७॥ कर्कोटकस्य नागस्य दमयंत्या नलस्य च॥ ऋतुपर्णस्य राजर्षेः कीर्तनं कलिना
शनं॥८॥ ब्रह्मा मुरारिस्त्रिपुरांतकारि भानुः शशी भूमिसुतो बुधश्च॥ गुरुश्च शुक्रः शनि राहुकेतवः
कुर्वंतु सर्वे मम सुप्रभातं॥९॥ त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव॥ प्रातः समुत्थाय रु
तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये॥१०॥ जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः॥ ॥२॥

केनापि देवेन हृदि स्थितेन यथा नियुक्तोस्मि तथा करोमि॥११॥ इत्यादि यथाशक्ति यथावकाशं सच्चिदा
नंदब्रह्मैवाहमस्मीत्येवं आत्मचिंतनं कृत्वा॥ भूमिप्रार्थनां कुर्यात्॥ समुद्रवसने देवि पर्वतस्तनमंडले
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥१॥ अथ दर्शनीयानि॥ श्रोत्रियं सुभगां गां च अग्निमग्नि
चितं तथा॥ प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते॥ रोचनं चंदनं गंधं मृदंगं दर्पणं मणिं॥ गुरु
मग्निं रविं यः पश्येन्नस्यैमे प्रातरेव हि॥ अथादर्शनीयानि॥ पापिष्ठं दुर्भगं चांधं नग्नं मुक्तकृत्तनासि
कं प्रातरुत्थाय यः पश्येत्तत्कलेरूपलक्षणं॥ नग्नपदं बालव्यतिरिक्तविषयं॥ अथवा नग्नाः छंदांसि
न विद्यंते यस्य स नग्न इत्युच्यते॥ अथ मौनविधिः॥ प्रभाते मैथुने चैव प्रस्रावे दंतधावने॥ स्नाने
भोजनकाले च षट्सु मौनं विधीयते॥ इति प्रबोधविधिः॥ अथ मूत्रपुरीषोत्सर्गविधिः॥ मूत्रपुरीषो
त्सर्गात्पूर्वं मृदाहरणविधिः॥ दक्षः॥ उभे मूत्रपुरीषे तु पूर्वमादाय मृत्तिकां॥ आहरान स्तुवे पश्चात्स

Indira Gandhi National
Centre for the Arts

॥सदाचा॥ चैलो जलमाविशेत्॥ तन्मृदाहरणे नियममाह॥ दक्षः॥ न च प्रक्लेन चेतिष्ठन् नाशुचिर्नलपं द्विजः॥
॥३॥ रूमादग्न्यादिवायं तदि अुखो नाहरेन्मृदं॥ शौचयोग्यां मृत्तिकामाह॥ यमः॥ आहरेन्मृत्तिकां विप्रः
कुलात्ससिकतां तथा। कूलात् शुद्धदेशात्॥ निषिद्धमृत्तिकामाह॥ विष्णुः॥ वल्मीकमूषकोत्खातां मृदं
नांतर्जलात्तथा॥ शौचावशिष्टां गेहाच्च नादद्याल्लेपसंभवां॥ अंतः प्राण्यवपन्नां च हलोत्खातां च
पार्थिव॥ परित्यजेन्मृदस्त्वेताः सकलाः शौचसाधने॥ अंतः प्राणवपन्नां सकीटां वर्णभेदेन मृत्ति
कामाह॥ मरीचिः॥ विप्रेषु शुक्लमृच्छौचे रक्ता क्षत्रे विधीयते। हरिद्रवर्णा वैश्ये तु शूद्रे कृष्णां तु निर्दि
शेत्॥ उक्तमृत्तिकाऽभावे॥ मनुः॥ यस्मिन्देशे च यत्तोयं या च यत्रैव मृत्तिका॥ सेव तत्र प्रशस्ता स्या ॥रप्रशं॥
त्तया शौचं विधीयते॥ एवं यथासंभवं मृदमादाय मूत्रपुरीषोत्सर्गं कुर्यात्॥ आगस्त्य राक्षसीमाशां
निवीती वाग्यतो दिवा॥ विण्मूत्रोत्सर्जनं कुर्यात् ध्वतशिश्न उदङ्मुखः॥ राक्षसीति नैर्ऋतीमाशां दि ॥३॥

शायां तु वक्ष्यः॥ वायुर्वर्यर्कगोसोमतुलसीस्त्रीद्विजन्मनः॥ पश्यन्नभिमुखो मूत्रपुरीषादि न कार
यत्॥ पाराशरः॥ अंगिरः॥ उत्थाय पश्चिमे यामे रात्रेराचम्य चोदकं॥ आचम्य द्विराचम्य॥ अंतर्धाय
तृणैर्भूमिं शिरः प्रावृत्य वाससा॥ वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्जितः॥ कुर्यान्मूत्रपुरीषे तु शौचो
देशे समाहितः॥ स्मृतिचंद्रिकायां॥ यमः॥ शिरः प्रावृत्य कुर्वीत शकृन्मूत्रविसर्जनं॥ अयज्ञियैरनार्द्रै
श्च तृणैः संछाद्य मेदिनीं॥ तृणग्रहणं काष्ठादेरप्युपलक्षणार्थं॥ तच्च यमः॥ तिरस्कृत्योच्चरेत्का
ष्ठं पत्रं लोष्ठं तृणानि च॥ नियम्य प्रयतो वाचं संवीतांगोऽवगुंठितः॥ तिरस्करणमंतर्द्धानं॥ संवीतां
गो वेष्टितदेहः॥ अवगुंष्टितः प्रावृतशिराः। आपस्तंबोपि॥ नोर्ध्वं नाधो न तिर्यक् च किंचिदीक्षेत
बुद्धिमान्॥ न भोनूम्यंतरं परपन्कृत्वा मूर्ध्न्युपवीतकं॥ अंगिरास्तु॥ कृत्वा यज्ञोपवीतं तु पृष्ठतः
कंठलंबितं॥ विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहितः॥ कर्णे निधानमेकवस्त्रविषयं॥ तथा च शां

Indira Gandhi National
Centre for the Arts

॥सदा०॥ स्नायनगृह्ये॥यद्येकवस्त्रोयज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यादिति॥पवित्रमपि दक्षिणे कर्णे नि
॥४॥ दध्यात्॥तथा च हारीतः॥ पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेदिति॥दर्भनिर्मितत्वेव निदध्या
त्॥तथाऽऽचारार्के॥नीवीमध्येषु ये दर्भा ब्रह्मसूत्रे च ये कृताः पवित्रांस्तान्विजानीयाद्येच कर्णे च दक्षि
णे इति॥तर्जन्यंतर्गतं रोप्यं शिखा ब्रह्ममयी यदि॥भोजने मैथुने मूत्रे कुर्वन्कृच्छ्रेण शुध्यतीति के
चित्॥अत्र कालभेदेन दिङ्नियममाह॥पाराशरे याज्ञवल्क्यः॥दिवा संध्यासु कर्णस्थब्रह्मसूत्र
उदङ्मुखः॥कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः॥इदं तु सामान्यशास्त्रं कर्णश्च दक्षिणः॥तथा च
मनुः॥मूत्रोच्चारसमुत्सर्गे दिवा कुर्यादुदङ्मुखः॥दक्षिणाभिमुखो रात्रौ संध्ययोश्च यथा दिशा॥इति
मनुवचनमेव प्रमाणं॥यदपि मनुना॥छायायामंधकारे वा रात्रावहनि वा द्विजः॥ यथासुखमुखः ॥चार०॥
कुर्यात्प्राणबाधाभयेषु च॥तदपि रात्रावहनि वा नीहारांधकारजनितदिङ्मोहविषयं॥मनुः॥दूरा ॥४॥

दावसथान्मूत्रं दूरात्पादावनेजनं॥उच्छिष्टान्ननिषेकं च दूरादेव समाचरेत्॥मूत्रमिति पुरीषोप
लक्षणं॥तद्देशप्रमाणमुच्यते॥ब्रह्मांडपुराणे॥प्रतिश्रयाद्दक्षिणे पश्चिमे न क्षिप्रं गत्वा क्षेपमा
त्रं शरस्य।कुर्यात्पुरीषं हि शिरोऽवगुंठ्य न तु स्पृशेज्जातु शिरः करेण।प्रतिश्रयो वसतिस्थानं॥एतच्च
दिनविषयं॥रात्रौ तु गृहस्यैकदेशेपि कुर्यात्॥तदाह आपस्तंबः॥अस्तमिते बहिर्ग्रामादारादा
वसथाद्वा मूत्रपुरीषयोः कर्म वर्जयेदिति॥वर्जनीयदेशानाह॥मनुः॥न मूत्रं पथि कुर्वीत न भस्मनि
न गोव्रजे॥न फालकृष्टे न जले न चित्यां न च पर्वते॥न जीर्णदेवायतने न वल्मीके कदाचन॥न
ससत्त्वेषु गर्तेषु न गच्छन्नापि च स्थितः॥न नदीतीरमासाद्य न च पर्वतमस्तके॥न कदाचन कुर्वी
त विण्मूत्रस्य [illegible] विसर्जनं॥ससत्त्वेषु सप्राणिषु बिलेष्वर्थः॥यमोपि॥तुषांगारकपालानि देवतायतना

Indira Gandhi National
Centre for the Arts

॥सदाचा॥ निच॥राजमार्गश्मशानानि क्षेत्राणि च खलानि च॥उपरुद्धो न सेवेत छायावृक्षं चतुष्पथं॥उदकं चो
॥५॥ दकांतं च पंथानं च विवर्जयेत्॥वर्जयेद्वृक्षमूलानि चैत्यश्वभ्रबिलानि च॥उपरुद्धो वेगवान्॥श्वभ्रं
विदीर्णभूभागः बिलं प्रसिद्धं॥हारीतोपि॥न चत्वरोपद्वारयोः मूत्रपुरीषे कुर्यान्न गोमयेन तीर्थेन
सस्यपूर्णेन यज्ञभूमौ न यज्ञियानां वृक्षाणामधस्तादिति चत्वरमंगणं॥उपद्वारं द्वारसमीपं॥वि
ष्णुरपि॥नापच्छादितायां भूमौ नोखरे न शाद्वले नोद्याने नोदकसमीपयोर्नकाथ इति॥शाद्वलो हरित
तृणप्रदेशः॥यमस्तु॥प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत्॥दृष्ट्वा सूर्यं निरीक्षेत गाम
ग्निं ब्राह्मणं तथा॥तत्र विशेषमाह॥आपस्तंबः॥न सोपानन्मूत्रपुरीषे कुर्यादिति॥उपानहौ ॥प्रशंसा॥
चर्ममयो॥तथा समावर्तनप्रकर्णे उपानद्युगमिति गृहस्थस्य चर्ममयमिति वृत्तिकृता नारा ॥५॥

यणेन व्याख्यातत्वात्॥स्मृतिसंग्रहे॥न सोपानत्पादुको वा छत्रवानांतरिक्षके॥नैवाभिमुखस्त्री
णां गुरुब्राह्मणयोर्गवां॥याज्ञवल्क्यः॥न क्षेताग्निं न नग्नां स्त्रीं न च स्पृष्टमैथुनं॥न च मूत्रपुरीषे तु ना
षुचीरान्हुतीको नरः॥हारीतः॥आहारं तु रहः कुर्याद्विहारं चैव सर्वदा॥गुप्ताभ्यां लक्ष्म्युपेतः स्यात्प्रका
शाभ्यां हीयते श्रियेति॥अशुचिर्मलादि न कुर्यात्॥तदुक्तं॥तैलाभ्यक्तस्तथा वांतः श्मश्रुकर्मणि मै
थुने॥मूत्रोच्चारं यः कुर्यादहोरात्रेण शुध्यति॥इत्यादिना अशुचेर्मलमूत्रोत्सर्गो निषिद्धः॥अत ए
व शुचिर्भूत्वा मलादि कुर्यात्॥अथ तस्मिन्काले हस्तस्थितस्योदकस्याशुद्धिरुक्ता सायणीये॥कर
स्थोदकपात्रश्च कुर्यान्मूत्रपुरीषके॥तज्जलं मूत्रसदृशं सुरापानेन तत्सममिति॥अन्यच्च॥गृ
हीत्वा जलपात्रं तु विण्मूत्रं कुरुते यदि॥तज्जलं मूत्रसदृशं पीत्वा चांद्रायणं चरेत्॥आपस्तंबस्तु॥

Indira Gandhi National
Centre for the Arts

॥सदाचा॥ शिरःपरिवेष्टनादेःक्रममाह॥शिरोवेष्टितं प्रथमं१ निवीतं२ दिशावलोकनं३ अंतर्द्धानं४ मौनं५
॥६॥ पुरीषं६ मृत्तिकाग्रहणं७ उदकमष्टममिति॥ अत्र विशेषमाह भारद्वाजः॥ मलमूत्रं त्यजेद्विप्रो
विस्मृत्येवोपवीतधृक्॥ उपवीतं तदुत्सृज्य दध्यादन्यन्नवं तदेति॥ ततो लोष्टादिना परिमृष्टगु
दमेहनो गृहीतशिश्नश्चोत्तिष्ठेत्॥ तथा च भारद्वाजः॥ अथापकृष्य विण्मूत्रं लोष्ठकाष्ठतृणादिना
॥उदक्तवासा उत्तिष्ठेद् दृढं विधृतमेहनः॥ उदस्तवासा उत्क्षिप्तवासाः॥ मेहनं लिंगं॥ स्कांदे॥ वा
मेन पाणिना शिश्नं धृत्वा तिष्ठेत्प्रयत्नवान्॥ अत्र विशेषमाह॥ हारीतः॥ लोष्टेन परिमुंजीत शु
ष्ककाष्ठेन वा गुदं॥ यत्तु गौतमोक्तौ॥ न पर्णलोष्ठाश्माभिर्मूत्रपुरीषापकर्षणं कुर्यादिति तदश्वत्था
दियज्ञियकाष्ठादिविषयं॥ इति मूत्रपुरीषोत्सर्गविधिः॥ अथ शौचविधिः॥ याज्ञवल्क्यः॥ गृही

तशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥ लिंगशौचं
पुरा कार्यं गुदे शौचं ततः स्मृतं॥ अतंद्रितोऽनलसः॥ देवलः॥ अशौचान्नोत्सृजेच्छिश्नं प्रस्रावोच्चा
रयोरपि॥ गुदं हस्तं च निर्मृज्य मृदंभोभिर्मुहुर्मुहुः॥ मृत्तिकापरिमाणमाह॥ शातातपः॥ आर्द्रा
मलकमात्रास्तु ग्रासा इंदुव्रते स्मृताः॥ तथैवाहुतयः सर्वाः शौचार्थं याश्च मृत्तिकाः॥ मलमूत्रशौ
चे इदमेव परिमाणं॥ न्यूनपरिमाणे न गंधाद्यपक्षये सत्यप्यर्धप्रसृत्यादि अधिकपरिमाणं द्रष्टव्य
मिति॥ पराशरमाधवमतं॥ अथ मृत्तिकासंख्यामाह याज्ञवल्क्यः॥ केवलमूत्रशौचे॥ एका
लिंगे करे तिस्र उभयोर्द्वे च मृत्तिके॥ तथा॥ एका लिंगे करे तिस्र उभयोर्मृद्द्वयं स्मृतं॥ मूत्रशौचं
समाख्यातं शुक्रे तु द्विगुणं स्मृतं॥ एतच्छौचं स्वप्नादिसंजातशुक्रोत्सर्गविषयं॥ स्त्रीसंगे तु पराश
रः॥ आ चामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतं॥ अनंतो तु यदा गच्छेच्छौचं मूत्रपुरीषवत्॥

Indira Gandhi National
Centre for the Arts

॥सदा०॥ ऋतौ तु मैथुने स्नायात् गर्भधारणशंकया॥ रेणुकारिकायां॥ ऋतौ तु गर्भशंकायां स्नानं मैथुनिनः
॥७॥ स्मृतं॥ न तौ मूत्रवच्छौचं द्विगुणं तदृतौ स्त्रियः॥ अत्र द्विगुणं शौचं रजस्वला स्त्री विषयं प्रथमदिन
मारभ्य चतुर्थदिनपर्यंतं॥ आचारादर्शे बौधायनः॥ मूत्रवद्रेतसः समुत्सर्ग इति बौधायनवाक्या
त्स्वप्नादिसंजातशुक्रेपि मूत्रवदेव शौचमवगम्यते॥ मूत्रशौचे पादप्रक्षालनं मृल्लेपनपूर्वकं
पादयोः मूत्रसंसर्गशंकया कुर्वंति अत्र शिष्टाचार एव मूलं न तु स्मृतिः॥ इति केवलमूत्रशौचं॥
अथ विशिष्टशौचं॥ मनुः॥ एका लिंगे गुदे तिस्रस्तथा वामकरे दश॥ उभयोः सप्त दातव्या मृदः शु
द्धिमभीप्सता॥ याज्ञवल्क्यः॥ पंचापाने गुदे कस्मिन्नुभयोः सप्त मृत्तिका॥ विश्वामित्रकल्पे॥ वा
मपादं पुरस्कृत्य पश्चाद्दक्षिणमेव च॥ प्रक्षालयेदिति शेषः॥ अन्यत्र दक्षिणं प्रथमं प्रक्षालये ॥चार०॥
त्॥ शौचे तु वाम पूर्वस्यादन्यत्र दक्षिणः सदा॥ आचारादर्शे यमः॥ तिस्रस्तु पादयोर्देयाः शुद्धि ॥७॥

कामस्य निस्पृशः॥ तिस्र इति प्रतिपादं इदं चास्यं तच्छंकायां अन्यथा तु प्रतिपादमेकैका पादयो
र्द्वयोरिति॥ ब्रह्मपुराणात्॥ अत्र मनुः॥ एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां॥ त्रिगुणं तु वन
स्थानां यतीनां तु चतुर्गुणं॥ दिवा यद्विहितं शौचं तदर्धं निशि कीर्त्तितं॥ तदर्धमातुरस्योक्तं आतुर
स्यार्धमध्वनि॥ स्त्रीशूद्रदेशशक्तानां बालानां चोपनीतिनां॥ गंधलेपक्षयकरं शौचं कुर्यान्न सं
ख्यया॥ गंगातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः॥ आमृत्यादाचरन् शौचं भावदुष्टो न शुध्य
ति॥ आदित्यपुराणे॥ स्त्रीशूद्रयोरर्धमानं प्रोक्तं शौचं मनीषिभिः॥ बालस्यानुपनीतस्य गंधलेप
क्षयावहं॥ बौधायनोपि॥ देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं॥ उपपत्तिमवस्थां च ज्ञात्वा शौ
चं प्रकल्पयेत्॥ शौचकरणप्रकारमाह पुनर्देवलः॥ विण्मूत्रश्च यथा न स्पृशेद्यथा चोरू न संस्पृशे
त्॥ बुद्धिपूर्वं प्रयत्नेन यथा नैताः स्पृशेत् स्फिजौ॥ स्फिजौ गुल्फौ॥ सायणीये॥ उद्धृतोदकमा

Indira Gandhi National Centre for the Arts

॥सदा०॥ दायमृत्तिका चैव यथा ग्यतः॥ उदङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणामुखः॥ शौचमिति शेषः पाराशरः॥ ती
॥८॥ र्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा॥ जलपात्राऽभावे प्रकारांतरमुक्तं प्रदीपिकायां॥ रत्निमात्रं जलं
त्यक्त्वा कुर्याच्छौचमनुद्धृते॥ पश्चात्तच्छोधयेत्तीर्थं त्वन्यथा ह्यशुचिर्भवेत्॥ ततः शौचकरणे हस्तनिय
मं निषेधमुखेनाह॥ धर्मविद्दक्षिणं हस्तः अधःशौचेन योजयेत्॥ तथा वामहस्तेन नाभेरूर्ध्वं न
शोधयेत्॥ प्रकृतिस्थितिरेषा स्यात्कारणादुभयक्रिया॥ कारणाद्रोगादेः॥ उभयक्रिया दक्षिणह
स्तेनाधःकायशोधनं वामहस्तेनोर्ध्वकायशोधनं॥ आचारादर्शे॥ शौचानंतरं॥ हारीतः॥ गोमयेन
मृदा वा कमंडलुं परिमज्य॥ स्मृतिचंद्रिकायां॥ आद्यंतयोस्तु शौचानामद्भिः प्रक्षालनं स्मृतं॥
मुनिर्णिक्तमृदं दद्यान्मृदंते जलमेव च॥ तस्य विशेषमाह॥ ऋष्यशृंगः धाराशौचं न कर्तव्यं शौच ॥चार०॥
शुद्धिमभीप्सता॥ चुलकैरेव कर्तव्यं हस्तशुद्धिविधानतः॥ अस्यैव वाक्यद्वयस्य गुदशौचे विस्ता ॥८॥

र उच्यते॥ प्रथमं दक्षिणहस्तस्य चुलकेन उदकपात्राज्जलं गृहीत्वा वामहस्तेन गुदप्रक्षालनं स
म्यक् निर्मलं कृत्वा॥ दक्षिणहस्तेन स्वल्पमृत्तिकां गृहीत्वा वामहस्तोपरि दूरतः प्रक्षेपणीया वाम
हस्तस्थितमृत्तिकया गुदमर्दनं पुनः पूर्ववदेव दक्षिणहस्तचुलकेन जलं गृहीत्वा वामहस्तेन प्र
क्षालनं कुर्यात्॥ इदमेकवारं मृत्तिकमृत्तिकया प्रक्षालनं जातं जलेन वामहस्तप्रक्षालनं सर्व
त्र॥ पुनर्दक्षिणहस्तेन वामहस्तोपरि मृत्तिकाप्रक्षेपं कृत्वा वामहस्तेन गुदे मृत्तिकामर्दनं पुनः॥
पूर्ववदेव चुलकेन प्रक्षालनं॥ इदं द्वितीयवारं॥ एवमेव तृतीयवारं॥ चतुर्थवारं॥ पंचमवारं चा॥
अंते जलेन सम्यक् प्रक्षाल्य मृत्तिकास्थानं दक्षिणहस्तघर्षणपूर्वकं जलेन सम्यक् प्रक्षालयेत्
दक्षिणहस्तेनैव कच्छबंधनं॥ दक्षिणहस्तेनैव रिक्तपात्रं गृहीत्वा हस्तपादादि प्रक्षालनार्थं
गच्छेत्॥ मलसंसर्गेण वामहस्तः अशुचिर्जातः अतः यावत् हस्तद्वय मिलित्वा प्रक्षालनं न भ

Indira Gandhi National
Centre for the Arts

॥सदा०॥ वेत्॥तावत्तु वामहस्तव्यवहारो मृत्तिकाजलादौ क्वापि न कर्तव्यः॥पादप्रक्षालनादौ मृत्तिकाग्रहणं
॥११॥ प्रक्षालनं च वामहस्तेन॥एवमेव स्नानविधौ कद्यादिगात्रप्रक्षालनेपि॥एवं युक्त्या विचार्य शौचे
कृते सति धाराशौचं न भवति॥संसर्गोपि न भवति॥महतां शिष्टाचारोपि भवति॥गुदप्र
क्षालनमृत्तिकासंख्यावदेव हस्तपादस्नानविध्यंगभूतकट्यादिगात्रप्रक्षालनेष्वपि मृत्तिका
संख्या कर्त्तव्या॥गुदशौचवदेव मूत्रशौचं कर्त्तव्यं॥स्मृतिभास्करे च॥न्यूनाधिकं न कर्त्तव्यं शौचं
शुद्धिमभीप्सता॥प्रायश्चित्तेन युज्येत विहितातिक्रमे कृते॥एतस्य कल्पितसंख्याया अर्वाक्स
मास्तौ वगंधाद्यपगमे वेदितव्यं॥एवं चोक्तसंख्यया अर्वाक् यत्र गंधाद्यपगमः तत्र संख्यानिय
मोत्र अदृष्टार्थ इत्यनुसंधेयं॥एवमुक्तशौचकरणे पि गंधोपलेपश्च नापेति तत्र संख्यारिक्ते ॥चार०॥
प्यविध इत्याह मनुः॥यावन्नापैत्यमेध्याक्तो गंधलेपश्च तत्कृतः॥तावन्मृद्वारि चादेयं सर्वासु ॥९॥

द्रव्यशुद्धिषु॥सायणीये वृद्धपाराशरः॥उपविष्टस्तु विण्मूत्रं कर्तुं यश्च न विंदते॥स कुर्यादर्द्धशौचं
तु स्वस्य शौचस्य सर्वदा॥न विंदते न करोति॥अत्र शौचकरणानंतरं कर्त्तव्यमाह विवस्वान्॥देशां
तरं गतो विप्रः क्षालयेत्तच्च भूतलं॥शौचशेषमदंतोयैर्नहि प्रक्षालयेद्यदि॥अशेषास्तस्य पितरे
भक्षयेयुरसंशयं॥देशांतरगत इत्यर्थः॥एतच्छौचमविलंबेन कुर्यात्॥विलंबे सचैलस्ना
नदर्शनात्॥अथ जलाभावे मूत्रपुरीषोत्सर्गं कृत्वा लोष्टकाष्ठादिना प्रोंछनं कृत्वा॥जलप्राप्तौ स्व
शौचं सचैलस्नानं कुर्यात्॥संवर्तः कृत्वा मूत्रपुरीषं वा यस्तानेनोदकं भवेत्॥स्नात्वा लब्धोदकः प
श्चात् सचैलस्तु विशुध्यति॥पाराशरः॥अरण्ये निर्जले रात्रौ चोरव्याघ्राकुले पथि॥कृत्वा मूत्र
पुरीषं वा द्रव्यहस्तो न दुष्यति॥द्रव्यमदनीयं॥हस्ते गृहीत्वापि मूत्रपुरीषकरणे पि तेन सहैव आ
चमने कृते शुद्ध एवेत्यर्थः॥तथा॥आपद्गतो विना तोयं शारीरं यो निषेधते॥एकाहं क्षपवंणं क

॥स०द०॥ वासश्चैलं स्नानमाचरेत्॥ अथ पादप्रक्षालनविधिरुक्तः॥ स्मृतिदीपिकायां॥ प्रथमं प्राङ्मुखः स्थित्वा
॥१०॥ पादौ प्रक्षालयेत् शनैः॥ तूष्णींभूत्वा समाधाय न कुड्येन विलोकयेत्॥ नग्नछन्नशयानश्वनाचैलो
न परान्स्पृशन्॥ न हसन्नैव संकल्प्यन्नात्मानमवलोकयन्॥ इत्येवं मृद्भिराजानु प्रक्षाल्य चरणौ
पृथक्॥ हस्तावामणिबंधाच्च कुर्यादाचमनं ततः॥ अत्राचमनात्पूर्वं कर्तव्य गंडूष संख्यामाह
॥आचार्यः॥ कुर्याद्द्वादश गंडूषान्पुरीषोत्सर्जने द्विजः॥ मूत्रे चत्वारि गंडूषान्भोजनान्ते तु षोडश॥
भक्ष्यभोज्यावसाने च गंडूषाष्टकमादरात्॥ गंडूषनिक्षेपस्थलमाह मार्कंडेयः॥ पुरतः सर्वदेवा
श्च दक्षिणे पितरस्तथा॥ ऋषयः पृष्ठतः सर्वे वामे गंडूषमुत्सृजेत्॥ अत्र प्रसंगात्कार्यांतरे कर्तव्य
शौचविधिरुक्तः॥ स्मृतिचंद्रिकायां॥ केशान्नीविमधः कायं न स्पृशेद्धरणीतलं॥ यदि स्पृशति चे ॥श०द०॥
त्तानि भूयः प्रक्षालयेत्करमिति॥ स्मृतिसंग्रहे तु॥ सकर्दमं तु वर्षासु प्रविश्य ग्रामसंकटे॥ जंघयो ॥१०॥

मृत्तिकास्तिस्रः परयोर्द्विगुणं न्यसेत्॥ अथ मूत्रपुरीषकरणार्थमुपविष्टस्य तच्चेन्न भवति तस्याप्यर्धशौचं
॥तत्र वृद्धपाराशरः॥ उपविश्य तु विण्मूत्रं कर्तुं यस्तेन विंदति॥ स कुर्यादर्धशौचं तु तस्य शौचस्य सर्वथा॥
अथ प्रसंगेन शरीरमलशौचमाह मनुः॥ ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः॥ यान्यधस्ता
न्यमेध्यानि देहाच्चैव मलाश्च्युताः॥ मलानपि स एवाह॥ वसाशुक्रमसृङ्मज्जा मूत्रं विट् कर्णविट् नखाः
॥श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः॥ वसा कायस्नेहः १ मज्जा शिरोभवं मेदः २ कर्णविट् कर्णम
लं ३ दूषिका नेत्रमलं ४ एते रूपघाते॥ बौधायनः॥ आददीत मृदोपश्च षट्सु पूर्वेषु शुद्धये॥ उत्तरेषु तु षट्
स्वद्भिः केवलाभिर्विशुध्यति॥ यमः॥ मूत्रे तिस्रः पादयोस्तु हस्तयोस्तिस्र एव च॥ मृदः पंचदश मेध्ये
हस्तादीनां विशेषः॥ एतदुत्सर्गकालादन्यत्रात्मीयमूत्रादिस्पर्शे॥ परकीये तु॥ परस्य शोणितस्पर्शे रि
तो विण्मूत्रजे तथा॥ चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृता इति॥ विष्णुः॥ नाभेरधस्तात्प्रबाहुषु चक्रा

Indira Gandhi National
Centre for the Arts

॥सदा०॥ यिकेर्मलैः॥सुराभिर्मद्यैर्वापहतोमत्तोयेस्तदंगं प्रक्षाल्याचांतः शुध्येत्॥ अन्यत्रापहतोमत्तोयेस्त
॥११॥ दंगं प्रक्षाल्यस्नात्वैव इन्द्रियोपहतः सन् उपोष्य पंचगव्येन दशनच्छदोपहतश्चेति॥ अथभोजन
कालेऽधोवायुसमुत्सर्गे॥गुरुः॥भुंजानस्यतुविप्रस्य प्रमादात्स्रवते गुदं॥उच्छिष्टमशुचित्वंचतस्य
शौचंविधीयते॥पूर्वंकृत्वातुशौचंतु ततः पश्चादुपस्पृशेत्॥ततः कृत्वोपवासंच पंचगव्येनशुध्यति
॥विप्रग्रहणमुपलक्षणार्थं॥शौचस्यफलमाह॥मनुः॥शुचिंदेवाश्चरक्षंतिरक्षतिपितरःशुचिं॥शु
चेर्बिभ्यतिरक्षांसियेचान्येदुष्टचारिणः॥अकरणेदोषमाह॥हारीतः॥अष्टशौचंनरंदृष्ट्वा प्रविशं
तीहराक्षसाः॥यक्षाःपिशाचाभूतानियेचान्येदुष्टचारिणः॥स्नानंदानंतथाध्यानंमंत्रकर्मविधिक्रि
याः॥मंगलाचारनियमाःशौचभ्रष्टस्यनिष्फलाः॥पाराशरोदक्षोपि॥शौचेयत्नःसदाकार्यःशौ ॥चार०॥
चमूलोद्विजःस्मृतः॥शौचाचारविहीनस्यसमस्तानिष्फलाःक्रियाः॥अत्रोक्तनियमातिक्रमेप्रा ॥११॥

यश्चित्तमुक्तं॥स्मृतिरत्नावल्यां॥गायत्र्यष्टशतंचैवप्राणायामत्रयंतथा॥प्रायश्चित्तमिदंप्रोक्तंनि
यमातिक्रमेसति॥व्यासस्तु॥अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा॥यःस्मरेत्पुंडरीकाक्षं
सबाह्याभ्यंतरःशुचिः॥ ॥इतिप्रयोगपारिजातपराशरमाधवनृसिंहाह्निकधर्मप्रवृत्तिआ
चारमयूखआचारादर्शाद्यनुसारीप्रबोधकालादिशौचविधिः॥ ॥अथाचमनविधिः॥ ॥
तत्रवृद्धपाराशरः॥कृत्वाथशौचंप्रक्षाल्यपादौहस्तौचमृज्जलैः॥निबद्धशिखकच्छस्तुद्विजआ
चमनंचरेत्॥कृत्वोपवीतंसव्येंसेवाङ्मनःकायसंयतः॥आचार्यः॥कृत्वायज्ञोपवीतीस्यात्प
रिधायांबरंपुनः॥शौचमितिशेषः॥प्रदीपिकायां॥संहतांगुलिनातोयंगृहीत्वापाणिनाद्विजः॥
मुक्तांगुष्ठकनिष्ठाभ्यांशेषेणाचमनंचरेत्॥सव्यान्वारंभेतियममाह॥यमः॥तावन्नोपस्पृ
शेद्विप्रोयावद्वामेननस्पृशेत्॥वामेहिद्वादशादित्यावरुणस्त्रिदशेश्वरः॥योगी॥दक्षिणेपत्यि

Indira Gandhi National
Centre for the Arts

॥सदा०॥ तंतोयं तर्जन्यासव्यपाणिनः॥तत्तोयंस्पृशतेयस्तु सोमपानसमंभवेत्॥प्रयोगपारिजाते॥ः
॥१२॥ स्मात्तचिमनभेदाः॥गृह्यपरिशिष्टोक्तं तूष्णीमाचमनं॥१॥स्मृत्युक्तं चतुर्वेदनामभिराचमनं॥२
याज्ञवल्क्यस्मृत्युक्तं तूष्णीमाचमनं॥३॥व्याघ्रपादस्मृत्युक्तं केशवादिनामभिराचमनं॥४॥
भारद्वाजस्मृत्युक्तं गायत्रीपादैराचमनं॥५॥पाराशरे प्रचेतसोक्तं तूष्णीमाचमनं॥६॥स
ग्रहोक्तं तूष्णीमाचमनं॥७॥भोजनोपक्रमाचमनस्यमंत्रांगस्पर्शादिकं प्रकारचतुष्टयेभि
न्नमेव अस्ति॥तच्चतुष्टयं भोजनविधौ स्पष्टंभविष्यति॥प्रयोगपारितसंस्कारकौस्तुभयोर्वि
श्वासेन पूर्वपरिगणितं व्याघ्रपादोक्ताचमनमपिस्मार्त्तचिमनमेव इति निश्चित्य अत्रलिख्य
ते॥स्मृतिप्रदीपिकायां॥व्याघ्रपादः॥नांगुल्यग्रैर्नपृष्ठेन नान्यथापरिमार्जयेत्॥श्रोतस्या ॥चार०॥
नानि सर्वाणि स्पृष्ट्वा स्पृष्ट्वा जलं स्पृशेत्॥आचमेद्ब्राह्मणो नित्यमित्याह भगवान्भृगुः॥ ॥१२॥

केशवादित्रिभिः पित्वा चतुर्थेन मृजेत्करं॥पंचमेन च षष्ठेन द्विरोष्ठावुन्मृजेत्क्रमात्॥तोसप्तमे
नचमृजेदेकवारंतु मंत्रवित्॥अष्टमेनतुमंत्रेणः अभिमंत्र्य जलं शुचि॥नामंसंप्रोक्षयेत्पा
णिं मनुनानवमेवच॥दक्षिणं दशमेनांघ्रिं वाममेकादशेन वै॥मूर्द्धानं द्वादशेनाथ स्पृशेद्द्वौष्ठप्र
ष्ठकं॥संकर्षणाय नम इत्यनेनांगुलिमूर्धभिः॥अंगुष्ठतर्जन्यग्राभ्यां संश्लिष्टाभ्यां जलैः सह॥
नासारंध्रे वासुदेवप्रद्युम्नाभ्यां स्पृशेत्शुभे॥अंगुष्ठानामिकाभ्यां तु संश्लिष्टाभ्यां जलैःस
ह॥अनिरुद्धाय नम इति संस्पृशेदक्षि दक्षिणं॥पुरुषोत्तममंत्रेण ताभ्यां वामं स्पृशेद्दृशं॥
तयांगुष्ठकनिष्ठाभ्यां श्लिष्टाग्राभ्यां जलैः सह॥अधोक्षजनृसिंहाभ्यां श्रोत्रे द्वे संस्पृशेत्क्रमात्॥
नाभिमच्युतमंत्रेण ताभ्यामेव स्पृशेद्बुधः॥श्रीजनार्दनमात्रेण तलेन हृदयं स्पृशेत्॥उपेंद्र
येनि मूर्धानं स्पृशेत्सजलपाणिना॥सर्वांगुल्यग्रभागैस्तु समाश्लिष्टैर्जलैः सह॥भुजौ तु हरिह

Indira Gandhi National
Centre for the Arts

।।सदा०।। ह्माभ्यांसंस्पृशेद्दक्षिणोत्तरौ।।आचामेद्द्विरेवं यो भगवन्नामभिः क्रमात्।।स यः पूतः सविहि
।।१३।। तेषूत्तरेष्वधिकारवान्।।आचार्यः।।हृद्गाभिर्जलैर्विप्रः क्षत्रियः कंठगाभिभिः।।तोपिबेत्ता
लुगाभिश्च विट्शूद्रोचागतापुनः।।विशेषमाह।।गोभिलः।।उभयत्र स्थिते दर्भैः समा
चमति यो द्विजः।।सोमपानफलं तस्य भुक्ता यज्ञफलं लभेत्।।निषिद्धदर्भानाह।।शंखः
का शाह स्तस्तुनाचामेत्कदाचिद्द्विधिशंकया।।नामभिर्न्नेन युज्येत दूर्वा हस्तस्तवञ्च।।कोपि
कोपि।। अपवित्रकरः कश्चिद्ब्राह्मणोयउपस्पृशेत्।।अकृतं तस्य तत्सर्वं भवत्याचम
नं तथा।।वामहस्ते स्थिते दर्भे।। दक्षिणेनाचमेद्यदि।।रक्तं तु तद्भवेत्तोयं पीत्वा चांद्रायणं
चरेत्।।अन्यदातुरसंभवे स्वयमेव जलपात्रं गृहीत्वाचमनं कुर्यात् स्मृत्यर्थसारे सौ
वर्णैरौप्यपात्रैस्ताम्रवेणुविल्वाश्म चर्मभिः अलाबुदारुपात्रैश्च नारिकेलैः कपित्थकैः

त्र पाकाष्ठैर्जलाधारैरन्यैरतिमृन्मयैः वामेनोद्धृत्य वाचामेदन्यदातुरसंभवे
माधवीये पाराशरे अलाबुताम्रपात्रं च करकं च कमंडलुं गृहीत्वा स्वयमाचा
मेत् न तेनाप्रयतो भवेत् तत्र विशेष उक्तः संग्रहे करकालाबुपात्रेण ताम्र
चर्मपुटेन च गृहीत्वा स्वयमाचामेत् भूमिलग्नेन नान्यथा कांस्यनायसपा
त्रेण त्रपुसीसकालिनैः पित्तलैः आचांतः शतकृत्वोपि न कदाचन शुध्यति श
ब्देनापः पयः पीत्वा शब्दे न घृतपायसं शब्देनापोशनं पीत्वा सुरापानसमं
हितत् तथा आपः पाणिनखस्पृष्टाः पिबेद्वा चामति द्विजः सुरां पिबति व्य

१४ ऌपमस्यवचनंयथा नचांगुलिभिः नवामेनवामेन पात्रमुद्धृत्यदक्षिणेन नपिवेत्॥
बौधायनः दानमाचमनं होमंभोजनंदेवतार्चनं पीढपादोनकुर्वीतस्वाध्यायंपितृतर्प
णं पीढपादलक्षणमाह आसनारूढपादस्तुजान्वोर्वाजंघयोस्तथा॥ कृतावसक्थि
कोयस्तुपीढपादःसउच्यते ॰जलस्याचमननिषेधस्तुशुष्कवस्त्रधारिणएव तथाच
हारितः आर्द्रवासाजलेकुर्यात्तर्पणाचमनंजपं शुष्कवासास्थलेकुर्यात्तर्पणाचम
नंजपं यमः उदकस्थश्चोदकेतुस्थलस्थस्तुस्थलेशुचिः पादौस्थाप्योभयत्रापि
आचांतोभयतःशुचिः उभयत्रजलेस्थलेचैकैकंपादौदात्वाचांतउभयतःउभय

त्रजलकर्मणिस्थलकर्मणिचशुद्धोभवतीत्यर्थः अकृत्वापादयोःशौचंतिष्ठन्मुक्तशि
खोपिवा विनायज्ञोपवितेन आचांतोप्यशुचिर्भवेत् स्मृतिरत्नावल्यां याम्यप्रत्यङ्मु
खत्वेनकृतमाचमनंयदि प्रायश्चित्तंतदाकुर्यात्स्नानमाचमनेक्रमात् अथनैमित्ति
काचमनकालविधिः सामगीये अनृतभाषणे स्वाध्याययज्ञोजनारंभे पिंडपि
तृयज्ञे अन्नक्षेस्पर्शने श्लेष्माश्रुरक्तकीलालपुरीषमूत्रोच्छिष्टरेषांउच्छिष्ट
विप्रस्याग्नेर्गवांअशुचेः स्पर्शने मूत्रंपुरीषंचकृत्वा निष्ठीवने दंतलग्ने हुत्वा
शुद्धोपिश्मशानाक्रमणे चर्वणे तांबूलचर्वणे क्लिन्नोमकौ ओष्टौस्पृष्ट्वा अभ्यं
गे उच्छिष्टानांपरस्परंस्पर्शे पादप्रक्षालने उच्छिष्टेनसंभाषणे अशुच्युपहते

Indira Gandhi National
Centre for the Arts

१५ नसहभाषणे सर्वदेहेषु जिह्वास्पर्शे नग्नस्पर्शे जपे दाने पितृपिंडो
दकेषु भोजनकाले उभयोः संध्ययोः वणपत्रयस्पर्शे प्रतिलोमवणानांस्प
र्शे चांडालम्लेच्छभाषणे शूद्रस्योच्छिष्टभाषणे जपेहोमे चांडालादीन्दृष्ट्वा
जानुनोरधस्तात् श्वादिस्पर्शे स्पर्शस्थानप्रक्षाल्य अग्निनाप्रतप्य आचमेत्
उपरिस्पर्शे स्नानमपिकुर्यात् अधोवायुसमुत्सर्गे आक्रोशे क्रोधशमने मार्जा
रमूषकस्पर्शे प्रहासे स्नाने प्रतिग्रहे होमे संध्यात्रितयवंदने बलिकर्मणि॥
स्नानादिबलिकर्मपर्यंतं आदावंतेच देवपूजादौ स्त्रीसंभोगे जंभायां उद्गारे
इत्यादीषु एतेषुनिमित्तेषु आचमनं कुर्यात् अथद्विराचमननिमित्तानी याज्ञ

वल्क्यः स्नात्वापित्वा क्षुतेसुप्ते भुक्त्वारथ्योपसर्पणे आचांतः पुनरेवाचमेद्वासो
विपरिधायच मार्कंडेयपुराणे सम्यगाचम्यतेयनिक्रियाः कुर्वीतवै शुचिःसा
यणीये सत्यामाचमनाशक्तावभावेसलिलस्यच पुर्वोक्तेषु निमित्तेषु दक्षि
णं श्रवणंस्पृशेत् तस्यप्रशंसामाह पाराशरः प्रभासादीनितीर्थानिगं
गाद्याःसरितस्तथा विप्रस्यदक्षिणेकर्णे नित्यंतिष्ठंतिदेवताः गंगाचद
क्षिणे श्रोत्रे नासिकायांहुताशनः उभयोस्पर्शेचैवतत्क्षणादेवशुध्यति देव
लः भोजनेदंतलग्नानिनिहृत्याचमनंचरेत् दंतलग्नमसंहार्यलेपंमन्येतदंत
वत् नतत्रबहुशःकुर्यात यत्नमुद्धरणेपुनः भवेच्चाशौचमत्यर्थंतएवंधा

Indira Gandhi National
Centre for the Arts

१६ द्रवीकृते अस्तेषु स्वस्थानच्युतेषु निसार्थी त्यजेः तमनुः दंतवद्दंतलग्नेषु जिह्वास्पर्शेऽन
तेनतु परिच्युतेषु च स्थानान्निगिरन्नेव तच्छुचिरिति एतच्च रसानुपलब्धौ वे
दितव्यं तदाह शंखः दंतवद्दंतलग्नेषु रसवर्जनमन्यत्र जिह्वाभिमर्शनादिति
फलमूलादिषु विशेषमाह शातातपः दंतलग्ने फले मूले भुक्तस्नेहावशि
ष्टके तांबूले चेक्षुदंडे च नोच्छिष्टो भवति द्विजः षट्त्रिंशन्मते तांबूले चैव सो
मे च भुक्तस्नेहावशिष्टके दंतलग्नस्य संस्पर्शे नोच्छिष्टश्च भवेन्नरः त्वग्भिः
पत्रैर्मूलपुष्पैस्तृणैः काष्ठमयैस्तथा सुगंधिभिस्तथा द्रव्यैर्नोच्छिष्टो भवति
द्विजः एतच्च मुखसौरभ्याद्यर्थेऽपि भुक्तावशिष्टविषय तांबूलसाहचर्यात्

दंतलग्नस्य संस्पर्श इत्यभिहीर्य दंतलग्नस्य जिह्वया संस्पर्शे सतीत्यर्थः याज्ञवल्क्योऽपि
मुखजा विप्रुषो मेध्यास्तथाचमनबिंदवः श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शु
चिः मनुरपि स्पृशंति बिंदवः पादौ यच्चाचमयतः परान् भौमिकैस्ते समास्तथा
न तैरप्रयतो भवेत् अन्नपाद ग्रहणमपवांतरस्याप्युपलक्षणं तथाचयमः
प्रयांत्याचमतो याश्च शरीरे विप्रुषो नृणां उच्छिष्टदोषो नास्त्यत्र भूमिन्तु
न्यास्तु ताः स्मृताः श्मश्रुविषये विशेषमाहापस्तंबः न श्मश्रुभिरुच्छिष्टो भ
वति यंतरास्ये सद्भिर्यावन्न हस्तेनोपस्पृशेत् स्मृत्यर्थसारे मधुपर्के च सो
मे च प्राणाहुत्यामथाश्च च आस्यहोमेषु सर्वेषु नोच्छिष्टो भवति द्विजः व

१८ सिष्ठः दंतवद्दंतलग्नेषु यच्चाप्यंतर्मुखे भवेत् आचांतस्यावशिष्टं स्यान्निगिरन्नेव
तच्छुचिः मुखजाविप्रुषाः सूक्ष्माः शुद्धास्ताश्च पराश्रियताः स्थूलाः ॥ श्वविप्रु
षः शुद्धाः यद्यंगे न पतंति ताः अंगपाते तु प्रक्षाल्याचमेत्तु परस्य चेत् वि
दुनाचमनं कुर्यात् अंगेषु नियतेष्वपि वेदाभ्यासे मुखाज्जाताः शुद्धाः एवतु
सर्वतः श्मश्रु चास्यगतं शुद्धं यद्यंगेन तु संस्पृशेत् इत्याचमनापवादः
अथान्यदप्याचमनविषये किंचिदुच्यते तत्र गोतमः द्रव्यहस्त उच्छिष्टो
भूमौ निधायाचामेत् अस्यार्थः यदि ब्राह्मणो भोजनादौ प्रवृत्तो द्रव्य
हस्तः कथंचिदुच्छिष्टस्पर्शनादप्रयतो भवति तदा द्रव्यं भूमौ निधाया

चामेत् द्रव्यमात्राम्भ्यवहार्यं तथा च वसिष्ठः प्रचरन्नभ्यवहार्येषु उच्छिष्टं यदि संस्पृ
शेत् भूमौ निक्षिपेत्तत् द्रव्यमाचम्य प्रचरेत्पुनरिति अभ्यवहार्येष्वन्नपाने
षु प्रचरन्परिवेषणं कुर्वन्नित्यर्थः बृहस्पतिरपि प्रचरन्नन्नपानेषु यदोच्छिष्टमुप
स्पृशेत् भूमौ निधाय तद्द्रव्यमाचांतः प्रचरेत्पुनरिति अत्र विशेषमाह शंख
लिखितौ द्रव्यहस्त उच्छिष्टो निधायाचम्याभ्युक्ष्य द्रव्यमिति एवं च द्रव्यह
स्तस्याचमनाच्छुद्धिः द्रव्यस्यतुातिधानाभ्युक्षणाभ्यामित्यनुसंधेयं य
दा तु द्रव्यस्यैव साक्षादुच्छिष्टस्पर्शस्तदा तत्परित्याज्यमेव यदाह वसि
ष्ठः उच्छिष्टमगुरोरभोज्यं स्वमुच्छिष्टमुच्छिष्टोपहतं चेति यत्पुनर्मनुनोक्तं

Indira Gandhi National
Centre for the Arts

१८ उच्छिष्टेन संस्पृष्टो द्रव्यहस्तः कथंचन अनिधायैव तद्द्रव्यमाचांतः शुचितामियात्

तदन्नस्यवहार्यवस्त्रादिविषयं इनस्त्रनीधानविधानात् मार्कंडेयो विकल्पमाह उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तो निधाय वा आचम्य द्रव्यमभ्युक्ष्य पुरादातुमर्हति कूर्मपुराणेपि तैजसं वै समादाय यद्युच्छिष्टो भवेद्द्विजः भूमौ निक्षिप्य तद्द्रव्यमाचम्याभ्युक्षेत्ततः यद्यमत्रं समादाय भवेदुच्छेषणान्वितः अनिधायैव तद्द्रव्यमाचांतः शुचितामियात् वस्त्रादिषु विकल्पः स्यात्तत्संस्पृष्टावेवमेव हि तत्स्पृष्टावुच्छेषणस्पृष्टो निधानमनिधानं वा कार्यमित्यर्थः अनन्नव्यवहार्यं प्रकृत्य बौधायनोपि तैजसं चेदादायोच्छिष्टः स्यात्तदुदस्याचम्यादास्यन्नद्भिः प्रोक्षेत्स चे

दन्ननोच्छिष्टः स्यात्तदुदस्याचम्यादास्यन्नद्भिः प्रोक्षेद्यथा चेदद्भिरुच्छिष्टः स्यात्तदुदस्याचम्यादास्यन्नद्भिः प्रोक्षेदेतदेवाविपरीतममत्रे इति उदस्य निधायेत्यर्थः विपरीतमनुदस्येति यावत् पक्वान्नमादाय मूत्रादिकरणे श्लोपस्ते वोक्तं द्रव्यं भूमौ निक्षिप्य तद्द्रव्यशौचं कृत्वा यथाविधि उत्संगे पात्रपक्वान्ने उपस्पृश्य ततः शुचिरिति एतदापद्यप्यशक्यनिधानद्रव्यविषयं अरण्ये नु दके रात्रौ चौरव्याघ्राकुलेपथि कृत्वा मूत्रपुरीषं वा द्रव्यहस्तो न दुष्यतीति बृहस्पतिस्मरणात् मार्कंडेयस्तु शौचमप्यनिधायैव कार्यमित्याह॥ पक्वान्नेन गृहीतेन मूत्रोच्चारं करोति यः अनिधायैव तद्द्रव्यमंके कृत्वा स

Indira Gandhi National
Centre for the Arts

२९ माश्रितं शौचं कृत्वा यथान्यायमुपस्पृश्य यथाविधि अन्नमभ्युक्षयेच्चैव उद्ध

त्यार्कस्य दर्शयेत् त्यक्षाग्रमात्रेण तस्मात् केशशुद्धिमवाप्नुयात् तथान्यत्र॥

शौचं कुर्यात् प्रथमं पादौ प्रक्षालयेत् ततः उपस्पृशेत् दभ्युक्षगृहीतं शुचि

तामितीयात् द्रव्यहस्तो गृहीतद्रव्यः द्रव्यपदं त्वसंकुचितमेव कृत्वा मूत्री

पुरीषं तु द्रव्यहस्तः कथंचन भूमावन्नप्राते छाप्य कृत्वा स्नानं यथावि॥

धि तत्संयोगात् पक्वान्नमुपस्पृश्य ततः शुचिरित्यापस्तंबवचनात् प्रक्षा

ल्य पादौ मिविक्षिप्याचम्याभ्युक्षणं ततः पुष्पादिनां तृणादिनां प्रोक्षणं

हविशां तथा तिवायुपुराणवचनात् निक्षीप्य द्रव्यं भूमौ धृत्वा इत्यर्थः

अथाचमनं फलं उक्तं वैयाघ्रपादः एवं ब्राह्मणो नित्यमुपस्पर्शनमाचरेत्॥

ब्रह्मदीयः क्रियाः कुरुते मोहादनाचम्यैव नास्तिकः भवंति हि प्रथिव्यां तस्य क्रियाः

सर्वेन शंशय: आचमनं चाधिकारितावच्छेदकं॥ मार्कंडेयः देवार्चनादिकार्यो

णि तथा गुर्वभिवादनं॥ कुर्वीत सम्यगाचम्य प्रयतोपि सदा द्विजः आचात

स्य प्रयतस्यापि कर्मारंभ प्रयुक्तमाचमनमने नोक्तं भवति॥ नृसिंहाह्निके॥

मूत्रपुरीषादिशौचनिमित्ताचमनेषु मज्जात्मादिना हस्तपादप्रक्षालनं क

र्तव्यं न तु सर्वत्र कर्मारंभादिनिमित्ताचमनेषु॥ देवलः प्रथमं प्राङ्मुखस्थित्वा

Indira Gandhi National
Centre for the Arts

१८ पादौप्रक्षालयेच्छनैः सर्वत्रपादप्रक्षालनं डपविष्टेवकर्त्तव्यं॥ तिष्ठन्नेवपादप्र
क्षालने कृतेउपविश्यपुनः पादप्रक्षालनमेव प्रायश्चितं॥ आचमनकाले
हस्ताज्जलं भूमौस्रवति तस्यफलं॥ नविष्णे॥ यत्तद्भूमावुदकंवीरसमुत्सृजति
मानवः वासुकिप्रमुखानागास्तेनप्रीणंतिनित्यशः तत्रप्रायश्चित्तमुक्तं षडि
शनित्य॥ मंत्रोच्चारिमाहाराज्ञौ कुर्यान्नाचमनंतुयः॥ प्रायश्चित्तमुक्तेयतेनिप्रः
प्राजापत्यार्द्धमर्हती॥ माहाराज्ञौमाहाराज्ञावप्रीत्यर्थः आत्राचमनप्रयोगः प
वित्रणीवद्धशिखउपवीतीप्रागुखउदङ्मुखवैशान्यभिमुखोवाआजानु

क्षालितपादयुग्म आमणिवंधं प्रक्षालितहस्तद्वयोयेनकेनापिसिद्धद्विवासा
स्त्वंतरुर्वोरंतरलीकृत्वा शुचौदेशे अप्रसारितसमस्थितपदयुगः सुमनाः प्रण
तोभूमिष्टपादोऽनासनस्थो भुक्त्वासनस्थोपिअजल्पस्थोजानुद्वैजलेतिष्ठन्
वाअजल्पन् अहसन् अगच्छन् अप्रौढपादः कमप्यस्पृशन् अचलन् क्वचिद
प्यनावर्जितदेहोदिश आत्मानंचैव नोकयन् अरघ्यास्थोऽत्वरोवामहस्तास्पृष्टं
फलं नवविवर्णमविरसमदुर्गंधि अवुद्बुदं स्पृष्ट्वा शुच्येकपाण्यनावर्जितं
वर्पधारातिरीक्तं पादप्रक्षालनशेषातिरिक्तं उद्धेयंच्येत्तदीभूमिस्रावितगं

Indira Gandhi National
Centre for the Arts

१९ अग्निप्रोक्षेणार्थजलशेषातिरिक्तेहस्तेनानानीतं अप्रदरमवेप्रदरमनवम
।।।।। तत्तिक्षमं अनप्तं रोगिणस्तत्तमा।। अकलुषंसंहतांगुलिनादक्षिणपा
णीनाजलंगृहीत्वामुक्तांगुष्ठकनिष्ठाभ्यांशेषवामहस्ततजेन्यादाक्षिह
स्तेअन्वारभ्यस्य ब्राह्मेण तीर्थेनक्षतादिनातद्वरोधेकायेनतदव
रोधेदैवेनब्राह्मणोहृद्गाभिःक्षत्रियःकंठगाभिर्वैश्यस्तालुगाभिर्जलमा
चमेत्।।स्त्रीशूद्रौचमुख्यांमतरप्राप्तिक्षमंयथोक्तमेवजलंत्रिवारमा
चामेत्।।ॐकेशवायनमः१ ॐनारायणायनमः२ ॐमाधवायनमः३

।।इतित्रिभिःपीत्वा।। ॐगोविंदायनमः४इतिदक्षिणकरप्रक्षालनं।। ॐविष्णवेनमः
५इतिजलसहितेनांगुष्ठमूलेनऊर्ध्वोष्ठमार्जनं।। ॐमधुसूदनायनमः६इतित
थैवअधरोष्ठमार्जनं।। ॐत्रिविक्रमायनमः७इतिसंहताभिस्तर्जनीमध्यमाना
मिकाभिःसजलाभिरेकवारमोष्ठद्वयमार्जनं।। ॐवामनायनमः८इत्यनेनजल
मभिमंत्र्य।। ॐश्रीधरायनमः९इतिपूर्वाभिमंत्रितजलेनवामहस्तप्रोक्षणं
ॐहृषीकेशायनमः१०इतिदक्षिणपादप्रोक्षणं।। ॐपद्मनाभायनमः११इति
वामपादप्रोक्षणं।। ॐदामोदरायनमः१२इतिशिरःप्रोक्षणं।। ॐसंकर्षण

Indira Gandhi National
Centre for the Arts

२०

यनमः १३ इतिसजलैरंगुलिमूर्धनिरूर्ध्वोष्ठं स्पर्शेत्॥ ॐ वासुदेवायनमः
१४ इति अंगुष्ठतर्जन्यग्राभ्यां श्लिष्टाभ्यां सजलाभ्यां दक्षिणनासारंध्रस्पर्शेत॥
ॐ प्रद्युम्नायनमः॥१५ इतिपूर्ववदेववामनासारंध्रस्पर्शेत॥ ॐ अनिरुधा
यनमः॥१६ इतिसजलाभ्यां श्लिष्टाग्राभ्यां अंगुष्ठानामिकाभ्यांदक्षिणनेत्रं
स्पर्शेत॥ ॐ पुरुषोतमायनमः॥१७ इतिपूर्ववदेववामनेत्रंस्पर्शेत॥ ॐ अधो
क्षजायनमः १८ इतिसजलाभ्यांमिलिताग्राभ्यां अंगुष्ठकनिष्टीकाभ्यांदक्षि
णकर्णस्पर्शेत॥ ॐ नसिंहायनमः॥१९ इतिपूर्ववदेववामकर्णस्पर्शेत॥ ॐ अच्यु

तायनमः॥२० इतिपूर्ववदेवनाभिंस्पर्शेत॥ ॐ जनार्दनायनमः॥२१ इतिसजलेन
दक्षिणहस्ततलेनहृदयंस्पर्शेत॥ ॐ उपेंद्रायनमः २२ इतिसजलेनानसंपूर्णह
स्तेनमूर्द्धानंस्पर्शेत॥ ॐ हरयेनमः॥२३ इतिसर्वांगुल्यग्रैर्मिलितैः सजलंदक्षि
णभुजंस्पर्शेत॥ ॐ श्रीकृष्णायनमः २४ इतिपूर्ववदेवउत्तरभुजंस्पर्शेत॥ त
तः शेषंजलंकिंचिद्वामहस्ते देयं॥ इतिदमीचमनं द्विराचमनेपादप्रक्षालनेनव
र्जमखिलंमावर्तते॥ भोजनोद्यांपक्रमाचमने सकृदेवोष्ठस्पर्शः तथाद्विजा
तीनामपि पुनराचमने ओष्ठस्पर्शमात्रं॥ अशक्तौतु त्रिः पीत्वाहस्तोप्रक्षाल्य

Indira Gandhi National
Centre for the Arts

श्रोत्रं स्पृशेत॥ अत्र च प्रयोगपारिजाते पाराशरमाधवे नृसिंहे ह्निकेरुद्रकल्पद्रुमे
२९ मितः॥ क्षराचां स्मृत्यर्थसारे आचारादर्शे आचारचिंतामणौ च प्रयोगः स्याचमन
प्रयोगः॥ अथ दंतधावनं॥ अस्यावश्यकत्वमाह॥ शातातपः॥ मुखे पर्युषि
ते नित्यं भवत्यप्रयतो नरः तस्मात् सर्वप्रयत्नेन कर्तव्यं दंतधावनं॥ आचार्यः
एव समाचम्य दंतानां काष्ठेन निमज्जेन्मन्त्रं॥ प्राङ्मुखोदङ्मुख आसीनः प्राङ्मु
खोदङ्मुख एव वा॥ वितस्तिमात्रमुद्दिष्टं दंतकाष्ठं द्विजन्मनां॥ स्त्रीशूद्रैर्द्वयं
स्तदर्द्धं स्यान्नाति शुष्के तु जंतुमत्॥ कनिष्ठांगुलिवत्स्थूलं तत्तदग्रकृतकू

र्चकं॥ वृक्षविशेषाः प्रयोगपारिजातादौ द्रष्टव्याः॥ स्मृतिः॥ तथैः पर्वैः सदा
कुर्याद्दंतं चैकादशीं विना॥ तयोरपि च कर्तव्यं जंबूनिवाम्रपल्लवैः॥
एकादश्यां तथैः पर्वैः कर्तव्यं दंतधावनं॥ स्नात्वा देवार्चनं कृत्वा व्र
तसंकल्पमाचरेत्॥ उदिते च सहस्रांशौ यः कुर्याद्दंतधावनं॥ स वितान
क्षितस्तेन पीतः वंशास्य घातकः॥ स्मृत्यर्थसारे॥ अंगारवालुकाभि
श्च भस्मांगुलिनखैरपि इष्टकालोष्टपाषाणैर्न कुर्याद्दंतधावनं॥ न
धान्य स्नानवेलायां न क्षये दंतधावनं॥ निराशास्तस्य गच्छंति देवताः

पितृभिः सह॥ अथ वेदंतकाष्ठानां निषिधायांतिथावपि॥ अपां द्वादशे गंडुषैर्विद
२२ ध्यादंतधावनं॥ काष्ठादिकं गृहित्वा प्राङ्मुख ईशानाभिमुखो वोपविश्य॥ आ
युर्बलं यशो वर्चः॥ प्रजाः पशुवसूनि च ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वनस्प
ते॥ इत्यभिमंत्र्य॥ ॐ अन्नाद्याय व्यूहध्वं सोमो राजायमागमत्॥ स मे मुखं
प्रमार्क्ष्यते यशसा च भगेन च॥ इति कात्यायनानां मंत्रः॥ इति मंत्रेण स वं दंता
न्संशोध्य तत्प्रक्षालितं त्यक्त्वा जिह्वोल्लेखनिकया जिह्वां संशोध्य प्रक्षा
ल्य नैर्ऋत्यां दिशि शुद्धप्रदेशे त्यक्त्वा द्वादशगंडूषान् कृत्वा द्विराचमेत्॥

दंतकाष्ठानामभावे निषिद्धदिने च प्रदेशिनीवर्जं मध्यमानामिकांगुष्ठांगुलिभिः
तृणपर्णैर्वा द्वादशगंडूषैर्वा मुखं संशोधयेत्॥ पूर्वोक्तं काष्ठाद्यन्यतमकाष्ठादि
कृतदंतधावनानंतरं कर्तव्यमाह॥ भगवान् शौनकः कृतशौचो द्विराचमस्य
कृत्वादौ दंतधावनं॥ पश्चाद्द्वादशगंडुषैः शुद्धीकृत्य द्विराचमेन्॥ ललाटे
हृदि बाह्वोश्च ऊर्ध्वपुंड्राणि धारयेत्॥ चतुर्भिः संकर्षणादिनामभिश्चदंत
दिभिः स्मृत्वोंकारं च गायत्रिं निबध्नीयात् शिखां ततः आचम्य प्राङ्मुखो
भूत्वा कुशपाणिः समाहितः आदिपदेन नस्य ग्रहणं॥ इति दंतधावनवि

Indira Gandhi National
Centre for the Arts

धिः॥ अथ शिखाबंधनं॥ तत्र व्यासः॥ स्मृत्वोंकारं च गायत्रीं निबध्नीयाच्छिखां
२३ बुधः॥ पुनराचमेद्धृदयं बाहू स्कंधौ च संस्पृशेत्॥ पूर्वंपश्चाद्वाचमेत्यर्थः॥
षड्विंशन्मते॥ मानस्तोकेति मंत्रेण खाबंधं तु कारयेत्॥ तथा॥ गायत्र्या
तु शिखां बध्वा नैर्ऋत्यां ब्रह्मरंध्रतः॥ पश्चात्तु त्रुटिकां बध्वा ततः कर्म
समारभेत्॥ कौथुमिः॥ शिखिवच्छिखया भाव्यं वामावर्तनिबद्धया॥ प्रद
क्षिणं द्विरावृत्य पाशांतः संप्रवेशनात्॥ इत्येवं च स्मृतिः पाठभेदात्पुनः
निरस्य॥ कौथुमिः॥ शिखिवच्छिखया भाव्यं ब्रह्मावर्तनिबद्धया॥ प्रद

क्षिणं द्विरावृत्य पाशांतः संप्रवेशनात्॥ प्रथमं द्विगुणं कृत्वा ब्रह्मावर्तमि
तीरितं॥ गायत्रीं प्रजपन्कुर्यात् शिखायाश्च निबंधनं॥ प्रातिकर्मणि नशि
न सिखाबंधनं॥ यत्तु॥ कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्येति कात्या
यनेन स्नानकाले शिखाबंधनमुक्तं तद्देवान्मानुषाद्यामुक्तशिखस्य बंध
नार्थं न तु सम्यक् पूर्वबद्धा शिखा मुमुच्य बंधनीयेत्येतदर्थमित्युक्तमा
रा चार्येण॥ शिखाबंधनविस्तरस्तु रुद्रकल्पद्रुमे द्रष्टव्यः सर्वत्र बद्धशि
ख इत्युच्यते तत्सावधानीकरणार्थं अस्यैव विशेषः स्नानदीपिकायां

Indira Gandhi National Centre for the Arts

२४

द्रष्टव्यः॥इति शिखावेधनविधिः॥अथोपवीतलक्षणं॥तत्रप्रमं निर्मा
णप्रकारो निरूप्यते॥तत्रदेवलः॥ग्रामान्निष्क्रम्य संख्या षण्णवत्यं
गुलीषु तत्॥तावत्त्रिगुणितं सूत्रं प्रक्ष्याल्यालिंगकस्त्रिभिः॥आपो
हिष्ठादयो ऽलिंगकाः॥देवगारे षवागोष्टेन द्यावान्यत्रवाशुचौसावी
त्र्या त्रिगुणं कुर्यान्त वसूत्रं तु तद्भवेत्॥विल्वाश्वत्थादियज्ञार्हवृक्ष
स्यान्यतमस्य तु॥बध्नीयात्तत्सजीवं तु पोतुम्योन्मइत्यथे॥न्नमदावेक्षितवं
स्यातापिहलं त पिदं हितत्त त्रिस्ताडयेत्करतलं देवानां त्वप्तिदं हितत्॥स

ग्यमदं गर्हित्वास्मिन् स्थापयद्भूरिति ब्रुवन् पत्रं पुष्पं फलं चापि व्याहृती
भिः प्रतिक्षिपेत्॥अग्निमंत्र्याग्नेयोरग्निश्चेति वत्तत्रयं त्रिभिः तत्रमंत्राः
भूरग्नये च पृथिव्यै च महते च स्वाहा॥भुवो वायवे चांतरिक्षाय च मह
ते च स्वाहा॥सुवरादित्याय च दिवे च महते च स्वाहेति॥हरिब्रह्मेश्वरेभ्य
श्च प्रणम्याचदधात्यथ॥यज्ञोपवीतमित्यादि मंत्रः स्याद्वरधारणे
॥यज्ञोपवितमित्यादि व्याहृत्यावापि धारयेत्॥प्रतितंतु देवताभेदमाह॥
सएव॥ॐकार प्रथमस्तंतुर्द्वितीयोग्निस्तथैव च॥तृतीयो नागदैवत्य

Indira Gandhi National
Centre for the Arts

श्च तुर्थः सोमदैवतः पंचमः पितृदैवत्यः षष्ठं श्चैव प्रजापतिः ॥ सप्तमो वसु
२५ दैवत्यो धर्मश्चाष्टम एव च ॥ नवमः सर्वदैवत्य इत्येतान व देवता इति ॥ आ
ह पितामहः यएतं नाभिजानाति ब्रह्मसूत्रसमुद्भवं ॥ वेदोक्तं निष्फलं तत
स्नानदानजपादिकं ॥ ब्राह्मणो यो न जानाति ब्रह्मसूत्रस्य संस्थितं ॥ मो
हात्मा वहते भारं पशुर्गौरिव सर्वदेति ॥ स्मृतिसारे ॥ पुत्राख्यः परमात्मा
य उच्यते चैवाहोत्रभिः उपवीतं ततोस्य दं तस्माद्यज्ञोपवीतकमिति
॥ आचार्यस्तु ॥ ज्ञात्वा विज्ञेय योरेकामविजानन् द्विजोत्तमः नत्यजे

दात्मनः सूत्रं ब्राह्मं ब्रह्मविनिर्मितं ॥ सिसृक्षुरेक एवाग्रे समासीनः शि
वः स्वयं ॥ त्र्यम्बा गुणमयी माया सूत्ररूपामिवाकरोत् ॥ तया तदात्मकं
विष्णुसूत्रायान्नदिवौकसां ॥ स्वयं ब्रह्मा मनवश्चैरुश्चास्य जपापसः ॥
ज्ञानात्मके न हरिणा ब्राह्मात्मनि शिवे व्यये ॥ तत्सूत्रमुपवीतत्वाद्ब्रह्म
सूत्रमिति स्मृतं ॥ सेयेन चोपवीतत्वाद्यज्ञसूत्रं विदुर्बुधाः ॥ तदा
यावत्त्वा स्वब्रह्मणा ब्रह्मसूत्रकं ॥ तावन्तो कास्त्रयो वेदास्त्रयो
देवास्त्रयो त्रयः ॥ शिवस्य त्रास्त्रयो वर्णास्त्रिवृत्सूत्रं समाश्रयम् ॥ त

Indira Gandhi National
Centre for the Arts

श्चतुर्थः सोमदैवतः पंचमः पितृदैवत्यः षष्टश्चैवप्रजापतिः॥सप्तमोवसु
२५ दैवत्योधर्मश्चाष्टमएवच॥नवमः सर्वदैवत्यइत्येतानवदेवताइति॥आ
हपितामहः यएतंनाभिजानातिब्रह्मसूत्रसमुद्भवं॥वेदोक्तंनिष्फलंतत
स्नानदानजपादिकं॥ब्राह्मणोयोनजानातिब्राह्मसूत्रस्यसंस्थितं॥मो
हात्मावहतेभारं पशुर्गौरिवसर्वदेति॥स्मृतिसारे॥यज्ञाख्यः परमात्मा
यउच्यतेचैवाहोतृभिः उपवीतंततोस्येदं तस्माद्यज्ञोपवीतकमिति
॥आचार्यस्तु॥ज्ञानविज्ञेययोरैकामविजानन्द्विजोत्तमः नत्यजे

दात्मनः सूत्रंब्राह्मंब्रह्मविनिर्मितं॥सिसृक्षुरेकएवाग्रे समासीनःशि
वःस्वयं॥त्रय्यागुणमयीमायासूत्ररूपामिवाकरोत्॥तयातदात्मकं
विष्णुस्सायात्तदिवौकसां॥स्वयंब्रह्मानवगुणोरुश्चास्यजपापसः॥
ज्ञानात्मकेनहरिणाब्राह्मात्मनिशिवेव्यये॥तत्सूत्रमुपवीतत्वाद्ब्रह्म
सूत्रमितिस्मृतं॥सैयेनचोपवीतत्वाद्यज्ञसूत्रंविदुर्बुधाः॥तद्यज्ञ
यावत्त्वाद्यब्रह्मणाब्रह्मसूत्रकं॥तावन्तोकास्त्रयोवेदास्त्रयो
देवास्त्रयोग्नयः॥शिवस्यात्रयोवर्णास्त्रिवृत्सूत्रंसमाश्रयम्॥त
Indira Gandhi National
Centre for the Arts

ष्टं थिमाश्च यत्तारस्त्रिमात्रो नादसंयुतः॥ तदूर्ध्वं च सावित्री विदमात्रा
२६ शिवाज्ञया॥ एवं द्वादशदैवत्यं ब्रह्मसूत्रं द्विजन्मनां॥ ब्रह्मणापि कल्पया
मास वेदाहारणमनुत्तमं॥ येनासिध्य तमात्रेण ब्रह्मसूत्रेण ते द्विजाः
भवंति ब्राह्मणा नाम वेदार्हाश्चात्र यस्त्विह॥ यावत्सम्मति वामांसे ब्र
ह्मसूत्रं द्विजस्य तत्॥ गुरुः प्रतिष्ठापयति कालेप्रमति संयतः तावत्स
मतितस्येव पि ताचार्यः स उच्यते॥ माता च तस्य सावित्री द्वितीयं ज
न्म चोच्यते॥ आकटेस्तत्प्रमाणं स्याद्दीर्घं तु स्थितं तथा॥ कनि

ष्टं गुष्टवत्स्थूलं तदूर्ध्वं वा त्रियत् शुभं॥ आयुर्हरत्यतिह्रस्व मतीदीर्घं
तपोहरं॥ यशोहरमतिस्थूलमति सूक्ष्मं धनापहं॥ पवित्रं परमं शुद्धमा
युष्य च श्रिया वहं॥ ॐ जस्यं ब्रह्मवर्चस्य ब्रह्मसूत्रं यथोदितमिति॥
यज्ञोपवीत करणं प्रकर्णं॥ हरिहरनाभ्य॥ देवलः॥ कार्पास क्षौमगोवा
लशाणवल्कतृणादिकं॥ सदा संभवतो धार्यमुपवीतं द्विजातिभिः
क्षुमा अतसी वल्कं तरुत्वक॥ असंभवतइति मुख्यासे नवइत्यर्थः
गोभिलगृह्ये॥ यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वाऽपि वा कुशरज्जुंवेति॥

Indira Gandhi National
Centre for the Arts

॥बौधायनः॥ कौशं सौत्रं त्रिस्त्रिवृत्समानामेरिति॥ कौशं कुशमयं॥ सौत्रं का
२० र्पासं॥ त्रिस्त्रिवृतं नवगुणं त्रिसरीकृतमित्यर्थः॥ नवबैत्रिवृद्भिर्निष्प
ते॥ तच्च सूत्रं कार्पासं कुशमयं वा ब्राह्मणस्य॥ मनुः कार्पासमुपवी
तं स्याद्विप्रस्योर्ध्ववृत्तं त्रिवृत्॥ शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्र
कं॥ कार्पासकं समादध्यात्॥ शुचि क्षेत्रे विशोधितां॥ त्रिवृतं तु त्रय
मथोवृतं॥ त्रिवृते चोपवीतं स्यात्तस्यैकोग्रंथिरिष्यते॥ ऊर्ध्ववृत्तमाह
॥संग्रहकारः करेण दक्षिणेनोर्ध्वं गतेन त्रीगुणीकृतं॥ वा नेतमानवैः

सूत्रे शास्त्रे ऊर्ध्ववृत्तं स्मृतं॥ ऊर्ध्वं गतेन ऊर्ध्वस्थितेन त्रिगुणं दक्षिणकरेण
पद्वलितं तदूर्ध्ववृत्तमित्यर्थः॥ वामावर्तं त्रिगुणं कृत्वा प्रदक्षिणावर्तं नव
गुणं विधाय तं देवत्रिसरं कृत्वा यथा मे के विदध्यात्॥ अत्र च कुशशणगो
वालादिषु न त्रिगुणत्रिसरादिनियमः॥ सूत्ररचनं तन्निपमोपदेशात्॥ अवघा
तादयस्तु व्रीहिधर्मत्वात्तत्कार्यकारिष्वपि विधेयाः॥ अत्र त्रिगुणत्रिसरादे
र्यज्ञोपवीतान्तर्गतत्वेऽपि न तद्धर्मत्वमिति व्यक्तं नारायणवृत्तौ॥ यज्ञोपवी
तरचनाप्रकारस्तु स्मृत्यर्थसारे हरिहरभाष्ये च॥ शुचौ देशे शुचिः सूत्रं संह

Indira Gandhi National
Centre for the Arts

तां गुणीमृत्य कौ॥आवेष्ट्य षण्णवत्यां तत्त्रिगुणीकृत्य यत्नतः अब्लिंगकै
२८ स्त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृत्तं च तत्॥ अप्रदक्षिणमावृत्तं सावित्र्या
त्रिगुणीकृतं॥अधः प्रदक्षिणावृत्तं समस्यान्नवसूत्रकं॥त्रिरावेष्ट्य दृ
ढं बध्वा हरिब्रह्मेश्वरान्नमेत्॥यज्ञोपवीतं परमं पवित्रमिति धारयेत्॥
सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकं॥ सावित्र्या दशकृत्वोद्भिर्मं
त्रिताभिस्तदुक्षयेत्॥ त्रिच्छिन्नं वाप्यधोयातं मुक्तानिर्मितमुत्सृजेत्
॥अनध्याये ऽप्यारोहे च ब्रह्मसूत्रेन तद्भवेत्॥ प्रोकारांतरमाह छंदो

गपरिशिष्टे॥कात्यायनः पृष्ठवंशे च नाभ्यां च धृतं यद्विंदते कटिं॥त
द्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितं॥ तस्मान्नाभिसमं कुर्यादुपवीतं
विचक्षणः॥स्मृत्यर्थसारेपि पूर्वप्रकारापेक्षयाप्रकारांतरमेवमुक्तं
॥यद्वेत्थपक्षे स्पृष्टवंशे च नाभ्यामिति वा कंपयेत्स्यात्॥ वामस्कंधकृतं
नाभिवृष्टं वंशयोर्द्धं तसद्धयाकटिपर्यंतं प्राप्नोति तावत्परिमाणमीत्यर्थ
:॥नातो लंबं न चोच्छ्रितं॥ अतो अस्माद्युक्तान्मानादधिकं लंबमानं
धार्यं॥ नाप्यस्मान्मानादुच्छ्रितं ह्रस्वमिति यावत्॥ अस्मिन्पक्षे नवगुण

Indira Gandhi National
Centre for the Arts

२८ यत्यावेष्टने॥किंतु तु यावत्तउक्तं॥मानं उपवीतं संपद्यते तावदवस्त्रमा
नेकल्पनीयं॥अत्राह्निनारायणवृत्तिकृत॥एतच्चगोभिलोक्तं प्रमाणमीती
॥यज्ञोपवीतमानान्नोदितिबौधायनोक्तस्याप्येवव्यवस्था॥अस्यकं
ठादुत्तारणनिषेधं प्रक्षालनार्थं च शाखाविशेषेण तदपवादे चाहोम
गुः॥मंत्रपूतंस्थितंकायेयस्ययज्ञोपवीतकं॥नोद्धरेच्चततः प्राज्ञोयद्य
च्छेयआत्मनः सकृदुत्तारणंतस्यप्रायश्चित्तीभवेद्द्विजः तैत्तिरीयाःकं
ठाःकण्वाश्चरकावाजसनेयिनः॥कंठादुत्तार्यसूत्रंतुकुर्युर्वैक्षालन

नद्विजाः॥बह्वृचाःसामगाश्चैवयच्चान्येयजुःशाखिनः॥कं
ठादुत्तार्यसूत्रंतुपुनरर्हंतिसंस्क्रियां॥पुनःसंस्क्रियांमंत्रेणोपवीतांतयोधार
णमेव॥अन्येगोदधिरन्तानेमातापित्रोमृतेहनि॥कंठादुत्तार्यसूत्रंतुकु
र्युर्वैक्षालनंद्विजाः एतद्वाक्यबोधितविषयेद्वैवोक्तव्यवस्था॥एतेननि
त्यस्नानविधौविहितयज्ञोपवीतप्रक्षालनविषयोक्तव्यवस्थेतिगोपी
नाथदीक्षितोक्तंपरास्तं॥एतच्चसूत्रयोपवीतंवस्त्रोपवीतान्नविज्ञेयं॥त
दुक्तंनिगमपरिशिष्टे॥वाससीयज्ञोपवीतानिकुर्यात्तदभावेत्रिवृता

Indira Gandhi National
Centre for the Arts

सुत्रेणकुसमुजयात्प्रतिसरस्तमिवीति॥वाक्तोत्रगोवाक्तः उक्तदेव
३० त्वचनात्॥नायणवक्षीवसिष्टः॥स्नानकानीहितिस्यस्यादेंतवीस
सापोतरं॥यसोपवीतेद्वेपाष्टेःसोदकश्च कमंडलुः॥स्मृत्यर्थसारे
हारिहरभाष्येच॥ब्रह्मचारिणएकंस्यात्स्नातस्यदेवहनिवा॥ततोयनु
तरीयार्थेवस्त्राभावेतदिष्यते॥एतद्यवस्त्रोत्तरीयाभावेस्तोयोपवीतधा
रणकर्मांगं॥वह्निवेतितुकाम्यं॥वह्निचायुःकामस्येतिदेवल्तो
क्तेः॥विश्वामित्रेःयसोपवीतेद्वेधार्ये श्रौतेस्मार्तेचकर्मणि॥ततोय

मुत्तरीयार्थेवस्त्राभावेतादिष्यते॥यद्यपित्ततीयोपवीतधारणमुत
रीयकार्यंविद्यादुत्तरीयमंत्रेणप्रति नातिनथापिमंत्रेणैवस्तत्तेक
र्मकर्तव्यमित्यभिधानात्प्रकृतेचमंत्रेणोपवीतधारणेस्येवस्मर
णीवत्वादुपवितमंत्रेणैवयुक्तं॥ततोयमुत्तरीयार्थस्मर्यताचत्तेवा
नुल्पत्वोसिद्धेवस्त्राभावइत्युक्तिरुत्तरीयाभावएवानुकल्पत्वार्थं॥
तेनत्ततीयेधृतेउत्तरीयंनानेत्तदपिधार्यमितीकोचित्॥तन्नेत्ययु
॥एकस्मिवक्वदाचिदनुकल्पत्वेप्राधान्येचाविराधात्॥ वस्त्रा

हः उत्तरीयस्य सवाकर्मोपलक्षणीकर्मधारणानुपपत्तेस्तदुपवीतवत्सर्वार्थं
३१ सकृदेव धार्यमिति तन्नोपवीतमपि ॥ तदंगीकारेण कर्मविशेषारंभात
रेमुखोत्तरीयत्यागेनेपि तत्प्रहणं ॥ बाहुन्यायात् ॥ न च तृतीयत्यागापत्ति
॥ सर्वार्थत्वेन धृतत्वात् ॥ उत्तरीयस्य सर्वदा सत्वासंभवादिति युक्तमुत्प
श्याम ॥ शिष्टाचाराप्येवं ॥ तृतीयमुत्तरीयाभावे तु । यथाऽऽश्रमी तमद्दन
पारोनातेवाः उत्तरीय वस्त्रोत्तरीयत्वेनोपादानेतु पश्चात्सामेतुत्तरीयमंत्रः
प्रवर्ततएव ॥ क्रियांतरत्वात् जातूकर्ण्यः वस्त्रोत्तरीयत्वेनोपादानेतु

पसवामेत्तुरीयमंत्रः प्रवर्तत एव ॥ क्रियांतरत्वात् जातूकर्ण्यः वस्त्रो
त्तरीयाभावे त्रिगुणं यज्ञसूत्रं च तुरंगुलं वा सूत्रैः परिमंडलं कुर्यात् स्म
त्येतरेपि ॥ ब्रह्मचारिण एकं तु स्नानस्य न्यूति तद्वयं ॥ तृतीये स्योत्तरीयं
स्याद्वस्त्राभावे तृतीयकं उपवीतं वटोरेकं द्वे तथेतरयोः स्मृते ॥ एके
मेवयतीनां स्यादिति शास्त्रस्य निश्चयः गृहस्थस्य नित्योपवीतविष
मेतत् वहुषु कामस्य एकमेतत् तत्र गृहस्थस्य स्याह ॥ देवलः वहुनिषु
क्कामस्येति ॥ ब्रह्मसूत्रे पसव्ये सेस्थिते यज्ञोपवीतिता ॥ प्राचीनावीतिता

Indira Gandhi National
Centre for the Arts

सव्येकंठस्थे च निवीतितेति॥अत्र श्रुतिः॥दक्षिणं बाहुमुद्धरत्तेवधत्तेस
३२ व्यतिमिय यज्ञोपवितमेतद्देवविपराजं प्राचीनावीतं संवीतं मानुषमिति
॥स्मृतिसारेतु॥ छेदे विनाशे वा स्नातः कन्यया निर्मितं शुभं॥विधवा
द्याभिरथवा सूत्रं गृहीतं वै शुचिरिति॥पतितं त्रुटितं वापी ब्रह्मसूत्रं
यदा भवेत् नूतनं धारयेद्विप्रः स्नानसंकल्पपूर्वकं॥यज्ञोपवीत
मेकैकं प्रतिमंत्रेण धारयेत्॥अथ यज्ञोपवीतप्रतिपत्तिमाह॥मनुः
मेखलामजिनं दंडं उपवीतं कमंडलुं॥अप्सु प्रास्य विनष्टानि गृही

त्वान्यानि मंत्रतः यदि मोहादुत्तारयेत् तदा मंत्रवदन्यत्परिदध्यात्
तदुक्तं॥मंत्रन्यास्तोपवीतं यज्ञो ध्वरेतत्क दाचन॥मोहाद्विजदुध
त्यपुनर्मंत्रेण धारयेत् एवं परधृतमपि न परिदध्यात् तदुक्तं॥
उपानहौ च वासश्च धृतमन्यैर्न धारयेत् उपवितमलंकारं स्रजं क
रकमेव च ब्रह्मसूत्रं विना भुंक्ते विण्मूत्रं कुरुते यदि॥गायत्र्य
ष्टसहस्रेण प्राणायामेन शुध्यति॥यज्ञोपवीतधारणं॥एतत्परि
धानं तु प्राङ्मुख उदङ्मुखो वोपविश्याचम्य॥यज्ञोपवीतमितिमं

Indira Gandhi National
Centre for the Arts

अस्य परमेष्ठी ऋषिः त्रिष्टुप्छंदः लिंगोक्ता देवता॥ सकलकर्मानु
३९ ष्ठानसिध्यर्थं मुपवीतधारणे विनियोगः॥ ॐ अथ स्नानजपहो
मादेर्दर्भपाणिना कर्तव्यत्वाद्दर्भोदर्भविधिरुच्यते॥ तत्र हारि
तः अच्छिन्नाग्रा नसपत्रांश्च समूलान्कोमलान्शुभान्॥ पितृ
देवजपार्थे तु समादद्यात्कुशान्द्विजः कुशहस्तेन यज्जप्तं दानं
चैव कुशैः सह॥ कुशहस्तस्तु यो भुंक्ते तस्य संख्या न विद्यते॥ स
पवित्रेण हस्तेन भुंजीयाद्वाचमेत्पीवेत् जपेद्दद्यद्दनेध्यायेतत्र

ह्मणस्तु विशेषतः प्रयोगपारिजाते॥ पवित्रकृतपवित्रेण नभुंजी
यान्न चाचमेत॥ न पिवेद्यदि कृत्वा तान्नतथा तच्छेण तेन वेत्
तस्माद्ग्रंथिकेनांबु पिवेद्भुंजीत चाचमेत् नास्करे॥ कौशेयं
विप्रपाणिस्थं ब्राह्मणो दक्षिणे करे॥ भुंजानस्तु विशेषेण गर्हि
ता न्नाविशोधनं॥ लक्षणलक्षितग्रंथिपुत्क पवित्रहस्तेन
भोजननिषेधः भोजने वर्तुलः प्रोक्त इति स्मृत्यंतरे वर्तुलस्याधिविधा
नात्॥ जलपानाचमनेदर्भहस्त एव कुर्यात्॥ अत्र सर्वकाले हेम

Indira Gandhi National
Centre for the Arts

पवित्रस्पदोबोनास्ती॥त्याहसएव॥ हैमेनसर्वदासर्वान्कुर्यादेवाविचा
३४ रयत् रौप्यदक्षप्रदेशिन्याविभ्रयाद्दीक्षितोद्विजः दक्षनामिकायां
विप्रोविभ्रयात्ग्रथिसंयुतं अग्रेपिकेचहेमेचलेपांलोहमयोङ्ग
वं॥गायत्राक्षरसंख्येनगर्ह्यांपात्ताग्रामुत्तमं॥ अनुष्टुभस्तथात्
प्यंत्रिष्टुभिः कनकेत्तमं॥गायत्र्यक्षरसंख्या चतुर्विंशत्यक्षराणि॥
चतुर्विंशत्यक्षरावैगायत्रीतिश्रुतेः॥ अनुष्टुभः द्वात्रिंशत्यराणि
॥द्वात्रिंशत्यक्षरानुष्टुभाविति श्रुतेः॥त्रिष्टुभः चतुश्चत्वारिंशदक्ष

राणि॥चतुश्चत्वारिंशदक्षरात्रिष्टुभाविति श्रुतेः॥एतदुक्तं नवतिय
थाक्रमं चतुर्विंशति॥द्वात्रिंशच्च॰नुश्चात्वारिशत संख्याकैः ताम्र
रजतसुवर्णैस्तस्तः शलाकाः कारयित्वा तामिः त्रिवृद्गुणीयकं
कारयित्वोक्तफलसिध्यर्थं धारयदिति॥तत्फलं॥एवं लोहत्रये
णैवकृतंरक्षोघ्नमुत्तमं॥अद्यघ्नं चपवित्रस्याद्रक्षाकारमुत्तमं॥
आयुष्करमनाधृष्यश्रुमदरोगनाशनं॥श्रुग्धौधार्यंदिवारात्रौत्र
पेसमम्नथापिवा॥जपे द्वामप्रदेशिन्यांधृत्वापस्तत्पवित्रकं

उस्मात्‌ नादिसंसिद्धैर्माहात्म्यसु द्विजोत्तमे ॥ अथवानामिकायां तु
३५ ग्रंथिहीनं कुशादिकं ॥ हेमाद्रिनाथ विज्ञ यात्सर्वकर्मस्वपि द्वि
जः इति वै पवित्रधारणे दुःखघ्नमानंदसुखदायकं ॥ हेम्नास्त्यंत्रे
जः इति वै पवित्रधारणे
वाधीमान्पवित्रं धारयेत्सदा ॥ स्नाने दाने जपे होमे स्वाध्याये पितृ
कर्मणि ॥ नापवित्रकरः कुर्यात्तत्कर्मफलाप्तये इति ॥ अथ
तिथिविशेषमधिकृत्याह ॥ कात्यायनः ॥ मासे नभस्ये यावास्यां द
र्भोच्चयो मतः ॥ अयातयामास्ते इर्नानियोज्याश्च पुनः पुनः इति शा

तातपः ॥ जपे होमे च दाने च स्वाध्याये पितृतर्पणे ॥ अयातयामास्ते द
र्भाः कुर्यात्सुवर्णरजतैः कुशैः एतत्सार्वकालनीकोपलक्षणार्थं ॥ ते
था च मार्कंडेयः ॥ कुशपाणिः सदा तिष्ठेद्ब्राह्मणो दंभवर्जितः
॥ स नित्यं हंति पापानि तूलराशिमिवानलः ॥ कुशप्रशंसा ॥ सायणी
वा ॥ कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः कुशाग्रे शंकरं वि
द्यात्त्रयो देवाः कुशे स्थिताः ॥ तस्मान्नित्यं धारयेत् ॥ व्यासः ॥ कुशैः
पूतं भवेत्स्नानं कुशेनोपस्पृशेद्द्विजः ॥ कुशेन चोद्धृतं तोयं सोम

Indira Gandhi National
Centre for the Arts

पानेन संमितं॥स्मृतिचंद्रिकायां॥छिन्नंति वीरुधो यस्तु वीरुत्संस्थे
३६ निशाकरे॥पत्रं वा पातयत्वे के ल्लेभाद्ब्रह्मघातकं॥ नार्द्रान्‌ तृनो
याज्ञात्री तृन्तुनीयान्नापि संध्ययोः॥ अमायामपि जछि द्यात्कुशान्ने
शादी ष्मसुरो नमः अत्र त्रिपुष्पयोगि कुशसमीत्तुच्छपत्राद्याहृ
रणेन प्रत्यवायः॥तथा च॥जाबालिः॥कुशान् शाकं च पुष्पाणि गवा
र्थं च नृणादिकान्॥निषिद्धे वापि गृह्णीयाद् मावास्याह नि द्विजः॥स्मृ
तिचिंतामणौ॥ अहन्यहनि कर्मार्थं कुशोद्धारप्रशस्यते॥नपुर्वेषु

हृतं कुशाद्यो ग्याश्चैवोत्तरेषु च॥अन्ये तु॥सप्तरात्रस्तु भाद्रमासित्वन
क्षत्रस्तु मुद्भवाः॥ते द्विजेन नियोक्तव्या दैव्यपित्र्य च कर्मणि॥पुनर्मा
सपर्यंते मा यातयामत्वमुक्ता॥तत्रैव॥मासि मास्याहृतेन कुशा मासी
मास्येव चोदितः॥नोत्तरोत्तरमासेषु धर्मविद्भिरसंमता॥ भरद्वाजस्तु
॥नदितिरे स्थितीरेथे तीर्थे क्षेत्रे च कानने॥जातः कुशाः समस्तासु
क्रियासु श्रेष्ठ उच्यते॥ हीनाग्रकः स्वयं शुष्क..शुष्काग्रः कृमिदष्टकः
जिनाग्रजः॥सकुसुमः कुशः कर्मस्व शोभनः॥ वल्मीकस्थः श्मशा

Indira Gandhi National
Centre for the Arts

नस्यऊरवरस्यस्तम्भवः अत्वजापातेपाशस्थः कुशः कर्मस्वशो
३८ भनः॥सदाघनरसोतस्थः सदाछायाप्रवर्धितः आनीयधाम्निचो
त्तश्चकुशः कर्मस्वशोभनः॥पात्नोशाम्बत्स्यखदिरवहन्नक्ष
समीपडः॥विक्लवैकंकतीतस्यस्तछायास्थः कुशः स्मृतः अनो
कहानामप्येषांसमयामत्यमुद्भवः छायास्थितोपिचकुशोमध्यमः
सर्वकर्मसु॥स्नानंत्वासेध्योपचारादिनित्यकर्मसमाप्य च॥नि
नित्यहोमंततः कृत्वात्स्मिन्सप्तार्चिषिद्विजः॥दात्रपणवस

पुक्तेव्याहत्याचसमस्तया॥निष्क्रम्यभवनात्प्राचीमुदीचीमपिवादीसंनिष्क्रा
मेदुक्तदेशेषुयत्रास्तिकुशसंचयः॥तत्रगत्वासचरणौहस्तौप्रक्षाल्यवा
म्यतः॥आचम्यसुमनाः सम्यक्प्राणायामंसमाचरेत्॥ततोनत्जमिमंवा
युंयमंवरुणमश्विनौ॥ॐपद्मोशंशचीनाथंविश्वान्देवान्सरस्वतीं
॥देवान्नृषिन्पिहन्स्कंदंगुरून्गणपतिंतत॥वसून्रुद्रांस्तथादित्यान्ब्रह्मा
णंविष्णुमीश्वरं॥वेदांश्चहृदयेध्यायन्नेतान्देवान्पृथक्पृथक्॥
ततोदात्रेणपूर्वास्यउदगास्योपवाकुशान्॥मुष्टिमात्रोपरिच्छेत्तु

Indira Gandhi National Centre for the Arts

छिंद्यात्प्रणवमुच्चारणे ॥ प्रेतक्रियार्थं पित्रर्थं मनि चारार्थं केतथा ॥ दक्षि
३८ णाभिमुखः छिंद्यात्प्राणा विति कौद्विजः ॥ हीनाग्रपूर्वकास्स्त्वकाकुशा
न षट् द्विजसत्तमः ॥ अन्यान्सल्लक्षणे कुशान्संगृह्णीयात्प्रयत्नतः ॥ त्रिव
त्तः शुल्बकुशैः कृत्वा प्रागग्रे चोदगग्रकौ वितत्याच कुशान्नेतान्क्षिपे
त्तस्मिन्यथा पुरा ॥ पश्चात् शुल्बेन तेनैव कुर्न बध्वा दृढं यथा ॥ प्राग
ग्रमुग्रान्वा शुचौ देशे क्षिपेत्गृहोपि न पचेमेकवत् शुल्बे विपरीतं तस्य
च ॥ क्षिप्ता कुशांस्तथा चम्यस्थापयेत्तान्प्रयत्नकं बुधः ॥ ततोनुपहतैरेतैः

कुशैः कर्माणि बुद्धिमान् ॥ श्रौतस्मार्त्तादिकर्माणि कुर्वीत फलभाग्भ
वेत् ॥ शुनाशुद्धवराहेणं मार्जारेणै कचस्तुषा ॥ खरेण कुक्कुटेनैव ॥
स्पृष्टः कर्मरिपुः कुशः ॥ रुप्यितः छेकन्नाशेन पतितेनांत्यजातिनाभि
पजारोगिणा स्पृष्टः कुशः कर्मस्वशोभनः ॥ देवलेन च षंढेन ब्राह्मण्ये
नास्तात जन्मना ॥ वर्जः सूतकिनास्पृष्टः कुशोनुष्ठेयकर्मसु ॥ रक्तश्ले
ष्मास्थिभिः स्पृष्टः क्रियायुक्तः पुराधृतः ॥ उच्छिष्टजनसंस्पृष्टः कुश
कर्मविनाशकः ॥ सूतिकाश्चोपिकावेस्यास्तात पूर्वानिसारिका अन्याः

Indira Gandhi National
Centre for the Arts

सदोषा यास्ताभिः कुशः स्पृष्टः स्त्रिया रिपुः आत्रेयिका गर्भिणी॥ दोषैरेवं
३९ विधैरन्यैरपि स्पृष्टः प्रमादतः कुशः कर्मस्वयोग्यः स्यात् आघ्रातः
पशुभिस्तथा पिंडकर्मणि ये युक्ताः कुशा ये पितृतर्पणे॥ उच्छिष्ट
चये युक्तास्ते योग्या न हि कर्मसु॥ दोषदुष्टान् कुशान् त्यक्त्वा गुणयु
क्तैः कुशैर्बुधः श्रुतिस्मृत्युक्तकर्माणि कारयेत्कर्मसिद्धये॥ आर्द्रः
श्रेष्ठतमः कर्मस्वन्यः श्रेष्ठोपि वा कुशः॥ विश्वामित्राश्च वाल्वौ
वौतथा दूर्वा वितरौ स्मृतौ॥ विधिना स्वीकृतान्दर्भान्द्विजन्मानो

द्विजन्मनः॥ अनुष्ठानाय चौर्येण नाहरेन्मानुचेत् बुधः तदनुज्ञो
विनविप्रः कुनौशो हस्तैर्यदि॥ कुर्यात्स्व कर्मानुष्ठाने तत्सर्वफ
लेनवेत॥ शंखस्तु॥ दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा गोहुताशनाः
अयातयामान्येतानि नियोज्यानि पुनः पुनः अत्र वर्म्मानाह॥ हारीतः
पतिदर्भाश्छिन्नौ दर्भा ये दर्भा यज्ञभूमिषु॥ स्तरणासनपिंडेषु षट्कु
शान् परिवर्जयेत्॥ ब्रह्मयज्ञेषु ये दर्भा ये दर्भाः पितृकर्मणि॥ ह
तामूत्रपुरीषाभ्यां तेषां त्यागो विधीयते॥ येत्वेतद्गर्भितादर्भा ये वछि

Indira Gandhi National
Centre for the Arts

न्नानखैः स्मृताः कथिताश्चाग्निदग्धाश्च दर्भास्तान्परिवर्जयेत्॥ एतद्द
४० र्भाहरणं स्वयमेव कुर्यात्॥ स्मृतिसारे॥ समित्पुष्पकुशादीनि श्रोत्रियः
स्वयमाहरेत्॥ शूद्राहृतैः क्रयक्रीतैः कर्म कुर्वन्पतत्यधः॥ आपदि
नेदं दूर्वादि॥ उत्तरार्द्धादिदमपि ज्ञायते स्वस्याहरणाशक्तौ ब्राह्म
णक्षत्रियवैश्याहृतैः कर्मकरणे दोषो नास्ति॥ कुशोत्पाटनविधि
माह॥ शौनकः॥ शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः॥
ॐकारेणैव मंत्रेण कुशान्स्पृष्ट्वा द्विजोत्तमः॥ विरंचिना सहोत्पन्न

परमेष्ठिनिसर्गज॥ नुद सर्वाणि पापानि दर्भ स्वस्तिकरो मम॥ इ
मं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः॥ हुंफट्कारेण दर्भांस्तु सकृ
च्छित्वा समुद्धरेत्॥ एतद्दर्भाहरणमष्टम्यां विनैकस्याङ्गं द्वितीयमा
गे कर्तव्यं॥ दक्षः॥ समित्पुष्पकुशादीनां द्वितीयः परिकीर्तितः॥
तद्दर्भलक्षणमुक्तं संग्रहे॥ अप्रसूताः स्मृता दर्भाः प्रसूतास्तु
कुशाः स्मृताः॥ समूलाः कुतपाः प्रोक्ताः छिन्नाग्रास्तृणसंज्ञकाः॥
ब्रह्मपुराणे॥ छिन्नमूला गृहीतव्याः प्रस्तरार्थे कुशोत्तमाः॥ अग्निका

Indira Gandhi National
Centre for the Arts

पैचसागे वसमूलान्परिवर्जयेत॥यमः समूलस्तु भवेद्दर्भः पितृणां
४१ श्राद्धकर्मणि॥एतदेकोद्दिष्टश्राद्धविषयं॥यमः एकोद्दिष्टे कु
शाः कार्याः समूलाः प्रेतकर्मणि॥बर्हिर्लूनाः सकृच्छिन्नाः सर्वत्र
पितृकर्मसु बर्हिर्लूनाः असमूलाइ तेर्ये॥स्मृत्यंतरे॥अमूला
देवकार्येषु पितृकार्ये समूलकाः आचारतो व्यवस्था ज्ञेया॥
शालंकायनः कुशाग्रैस्तर्पयेद्देवान्मनुष्यान्कुशमध्यतः॥
द्विगुणीकृतमूलाग्रैः पितॄन्संतर्पयेद्द्विजः॥स्मृतिसागरे॥जाबा

लिः दर्भास्तु योनुष्ठानाय याचते॥नानुष्ठानफलं तस्य दातुरेव हि तत्
फलं॥शंखः कुशालाभे द्विजश्रेष्ठ काशैः कुर्वीत यत्नतः तर्पणादी
नि कर्माणि काशाः कुशसमाः स्मृताः॥विष्णुः कुशाभावे कुशस्थान
का दूर्वा यवा मताः अन्यच्च॥कुशाः काशा यवा दूर्वा गोधूमाश्च
पकुंदराः उशीरा व्रीहयो मौंजा दश दर्भाश्च वल्वजाः काशस्तु रौ
द्रो विज्ञेयः कौशं ब्राह्मं तथा स्मृतं॥आर्षं तु दैवमाख्यातं वैश्वा
मित्रं तु वैष्णवं॥कुशाः काशाः शरा दूर्वा यव गोधूम वल्वजाः सुव

Indira Gandhi National
Centre for the Arts

णौरजतताम्रा दशदर्भाः प्रकीर्तिताः स्नाने होमे तथा दाने स्वाध्याये तर्प
४२ णेपि च ॥ स्मृति ॥ काशभावे ग्रहीतव्या अन्ये दर्भा यथोचिताः दर्भा
भावे स्वर्णरूप्यताम्रैः कर्मक्रिया सदा ॥ मार्कंडेयः कुशपाणिः सदा
तिष्ठन् ब्राह्मणो दंभवर्जितः स नित्यं हंति पापानि तूलराशिमिवा
नलः ॥ व्यासः सव्यः सोमग्रहः कार्यो दक्षिणः सपवित्रकः अं
तर्गर्भिणं साग्रं कौशं द्विदलमेव वा च ॥ प्रादेशमात्रं विज्ञेयं पवित्रं
यत्र कुत्रचित ॥ सुमंतुः सग्रंथौ नाग्रौ विगर्भौ तु कुशौ द्वौ दक्षिणे

करे ॥ सव्ये चैव तथा त्रींश्च विन्यस्य सर्वकर्मसु ॥ गोभिलः ॥ वज्रो
यथा सुरेंद्रस्य तथैव हस्ते हरस्य च ॥ चक्रायुधं यथा विष्णोरेवं विप्रकरे
कुशाः पवित्रधारणप्रकारमाह ॥ अत्रिः उभाभ्यामपि हस्ताभ्यां विप्रै
दर्भपवित्रके ॥ ब्रह्मग्रंथिसमायुक्ते पवित्रे मध्यपर्वणि ॥ पाणि
भ्यां सर्वदा धार्ये कर्मकाले विशेषतः प्रथमे त्वंगुष्ठे त्वथ द्वितीये तु
ल्लनेघयत्त नयोस्तु पर्वणोर्मध्य पवित्रं धारयद्बुधः अनेन धृतेप
वित्रेन धार्यमित्याह ॥ अन्यैर्धृतं न गृह्णीयात् पवित्रं तृणसंभवं ॥ हेम

Indira Gandhi National
Centre for the Arts

दयस्तुसंग्राह्याःसमङ्क्रिमन्तुवह्निना।मंत्रेणधारयेद्विप्रःपवित्रंसर्व
४२ कर्मसु॥मंत्रंविनाधृतंयत्तत्पवित्रंमफलंभवेत्॥तस्मात्पवित्रमं
त्राभ्यांधारयेदग्निमंत्रच॥प्रणवस्तस्यमंत्रःस्यात्समस्तव्याहृतिस्त
था॥दध्यात्पवित्रमनयोरेकेनश्रुतिवर्जितः॥श्रुतिवर्जितःअध्ययन
रहितः वेदाध्ययनवांस्तु॥पवित्रेस्थोवैष्णव्यो॥इतित्रेणधारयेत्॥
पवित्रोक्तप्रकारेणहेम्नाकुर्यात्तीहोदितानिवै॥तानिसर्वाणिकुर्वी
पवित्रकरोद्विजः॥नित्यनैमित्तिकेवापिकर्मोपक्रमणेद्विजः॥

धृतंपवित्रंकर्मान्तेग्रंथिमुक्त्वापातयेत्॥पवित्रलक्षणं॥
स्मृतिभास्करे॥चतुरंगुलमप्यग्रंग्रंथिमेकांगुलंतथा॥वलयंद्व्यं
गुलंचैवपवित्रस्यापिलक्षणं॥सर्ववेदानांपवित्रकरणं॥वल
यस्यांगुलीमानंग्रंथिरेकांगुलीप्रमा॥चतुरंगुलमग्रंस्याद्दस्य
स्थानमनामिका॥पवित्रनिर्माणप्रकारः अंगुष्ठंपर्वमेदूर्ध्वंत
र्जन्यांतुपुनःपुनः॥स्थानमुद्रामधःकृत्वाकूर्चवत्ग्रंथिबंधनं
॥गरुडपुराणेपि॥अस्त्यन्योवैष्णवोमार्गोब्राह्मणमार्गेविनिर्मितः॥

Indira Gandhi National
Centre for the Arts

सकृत्प्रदक्षिणीकृत्य पवित्रमभिध्यपत्॥ तद्ब्रह्मग्रंथिमत्प्रोक्तं पवि
४८ त्रं वेदवेदिभिः पवित्रकृत्तुरभिमुखः प्रदेशो ब्रह्ममार्गः तत्र विशे
षमाह॥ आश्वलायनः॥ साग्राभ्याम् तु दर्भाभ्यां प्रदक्षिणेन म
ध्यतः॥ मत्स्योऽग्रावुद्धृतौ कृत्वा कुर्यात्फं थि चमेत्र तत्॥ तेन कुर्या
त्ग्रंथिं पवित्रस्य द्विजोत्तमाः॥ स्नानदीपिकायां प्रकारांतरेण
ब्रह्मग्रंथीः त्रिगुणीकृतरज्जुस्तु त्रिवृत्सा सा नियोजयेत्॥ ब्रह्म
ग्रंथिः सवितेयः सदा होम्यादि कर्मसु॥ कात्यायनः॥ स्नाने

होमे तथा दाने स्वाध्याये पितृतर्पणे॥ सपवित्रौ सदर्भौ वा करौ कुर्वी
त नान्यथा॥ संख्यस्तु ब्रह्मयज्ञे जपे चैव ब्रह्मग्रंथिर्विधीयते॥ भोज
ने वर्तुलं प्रोक्तं एवं धर्मो न हीयते॥ तदकरणे प्रायश्चित्तमुक्तं॥
स्मृतिभास्करे॥ मुक्तदर्भैर्न भोक्तव्यं नुक्ता देव्याः शतं जपेत्॥ अ
थ कुशपवित्रचतुष्टयविवेकः एको ब्रह्मग्रंथिः द्वितीयो वर्तु
लग्रंथिः तृतीयं वलयपवित्रं ब्रह्मग्रंथिलक्षणं पूर्वं विहितं॥
भोजनोपयोगी वर्तुलग्रंथिस्तु लौकिकः पूर्वी पोशने कृत्वाप

Indira Gandhi National
Centre for the Arts

श्चात्ग्रंथिबंधनं पश्चात्प्राणाहुतिहोमादि संपूर्णभोजनं कृत्वाग्रंथि
४५ मोचनमात्रं कृत्वा पवित्रसहितहस्तेनैव उत्तरापोशानं कृत्वा मंड
लेपवित्रं प्रक्षिपेत्॥ एतावान्परिश्रमः इति ज्ञात्वा स्वल्पप्रयासेन
बंधनं मोचनं च यथा न वेत्तथा अग्रवर्जं वर्तुलं ग्रंथिः कर्तव्यः
भोजन ब्रह्मयज्ञजपेषु ग्रंथिविधानमात्रं कृतं ग्रंथिराहितपवि
त्रं धारणं कृत्वा भोजनादि कर्म न कर्तव्यमिति निषेधपूर्वकं प
त्यवायस्तु नोक्तः॥ अतः कारणात् विहितग्रंथिर्भोजनादिषु अ

वश्यकर्तव्य एव॥ यदि दैवान्नुषाद्वा प्रतिबंधात् आलस्या
दिना अशक्यत्वेन वा वलयपवित्रयुक्तहस्तेन भोजनादि क
र्मकृतं चेद्दोषो नास्ति॥ भोजनव्यतिरिक्तकर्माणि मुक्तदर्भहस्ते
नापि कृतव्यानि॥ कुतः॥ स-पवित्रः सदर्भो वेत्यादि कात्याय
नस्मृति विधानात्॥ तृतीयं वलयपवित्रं कथं कृत्वा व्यामित्या
शंकायां तस्य शिष्टाचारानुसारेण प्रकार उच्यते॥ दर्भद्वयम
ध्यं अनामिकायां सकृत् वेष्टयित्वा अवशिष्टमूलनाग्रभागा

Indira Gandhi National
Centre for the Arts

स्परशुसदृशं एकत्रपवित्रिवर्त्तनंकृत्वा अनामिकापर्व्व भागेवे
४६ ष्टितभागमध्येग्रहनंकर्त्तव्यं॥यथालोकेग्रंथिविनातृणपूल
केबंधनंक्रियतेतथा अनामिकायांबंधनंकर्त्तव्यं॥शिष्टास्ता
पिद्रष्टव्यं॥इदंवलयंपपवित्रंभोजनाचमनब्रह्मयज्ञजपादि
सर्वकर्मासु आनिषिद्धिमेव॥ चतुर्थमुक्तदर्भरूपमेवपवित्रं॥
इदंभोजनेनिषिद्धं॥अप्यत्रआचमनादिकर्मसुतु आनिषि
द्धंसर्वकर्म अनेनकर्मव्यमेव॥इतिकुशपवित्रचतुष्टयवि

वेकः॥ ॥२०॥ भेदेनपवित्रधारणं॥आत्रि:॥अनुलोमत्वेनदे
शेतुपवित्रंधारयेद्द्विजः॥रत्नाद्धिपतिके चैत्राविश॥मग्रेकस्यच॥
कात्यायनःसपवित्रःसदर्भोवाकर्मांगाचमनंचरेत्॥नचोच्छिष्टं
तत्सदर्भंतुत्क्वोच्छिष्टंतुवर्जयेत् इदंवचनंग्रंथिहीनपवित्रा
।भिप्राया॥शौनकेपि॥पवित्रस्यतुनाशोचमाचांतेपिकदाचन॥
पितृणांतर्पणेत्याज्यंभोजनेचाविशेषतःसंग्रहकारःउत्तरीयंपवाप
हृतजंन्यारजतंतथा॥नजीवपित्रकेधार्यंस्पृष्टोवाविद्यतेयदिप
वित्रस्यपदादिस्पर्शनेविशेषमाह॥

४८ आचार्यः पदा स्पृष्टं पवित्रं च वर्जयेत्तत्क्षणात्ततो नवं॥ विप्राणां चरणस्पृष्टं पादाप्र
क्षालनेन चयत्॥ यत्पवित्रं तत्क्षणमयममपि शुद्धं न दुष्यति॥ त्यजेत्तारब्धक
र्मांतेर विसृस्याप्य पवालेनेन॥ जीर्णपवित्रस्य प्रतिपत्तिः तस्मिन्जीर्णे
क्षिपेत्तोये वह्नौ वा तत्सूत्रवत्॥ भूमिं खात्वा पांशुद्वारुग्भिस्तारेण
गूहयेत्॥ पवित्रपाते विशेषमाह॥ आचार्यः पवित्रपतिज्ञाते तथाज
पमण्वपि॥ प्राणायामं त्रं कुर्यात्स्नात्वा विप्रो घमर्षणं॥ कुशहस्तः प
वेत्तोयं कुशहस्तः सदाचरेत्॥ सर्वेपि कुशहस्तेन न कदाचिदुपस्पृ

शेत्॥ भुक्त्वा ग्रंथिं विमुच्याघतेन पित्वा जलं सह॥ तत्पवित्रं त्यजेद्भूमा
वप्यामेत्रिनजातु चित्त॥ विसृजेन यदि पात्रे तु पवित्रं विसृजेद्यदि॥ प्रा
जाप संचरेत्त्कः कृं तत्किल्विषविशुद्धये॥ शमलप्रसवोत्सृष्टो चंडा
लजभाषणे॥ पवित्रं करशं क्षास्यं दक्षिणे श्रवणेन्यसेत्॥ गोपुच्छरो
मभिः कृत्वा पूर्वाभिहितलक्षणं॥ पवित्रं धारयेद्विप्रः कर्मोपकर्मणे
सदा॥ रोमणो पवित्रं करणे नियमेन कुशेषिवा॥ कुशरज्वो पर्यास्यूत
प्रमाणे तथा॥ कर्मोपुनराज्ञायपपवित्रं द्विहिः शेमाणि मध्यमेवधास्तु

Indira Gandhi National
Centre for the Arts

द्रंढं च कुशैः सह ॥ हेमांगुलीयकेनापि मार्जनं सर्वपापाहं ॥ रोमसंग्रहणे विप्रश्र
४९ मुखानां द्विजन्मनां ॥ धवलीरुणपिताः स्युर्गावस्तयथाक्रमं ॥ एतासामि
व सर्वासां प्रशस्ता कपिलागवां ॥ सर्वेषां विप्रमुख्यानां रोमसंग्रहणे न
वं ॥ अंजना भा विजीर्णा गौर्वंध्यारहितकर्णका ॥ नवप्रसूता सरुजा चि
त्राः कृशा नशोभना ॥ स्वस्वोक्तवर्णा युवतिः सवत्साशांतविग्रहा ॥ संपूर्णा
वयवा या गौः सोत्तमा तो मसंग्रहे ॥ स्नात्वा शुचिर्द्विजो दांतं स्वा गो निष्ट
म्य पूर्ववत् ॥ गां तु प्रदक्षिणीकृत्य मंत्रेण प्रणमेद्यथा ॥ रुद्रमातर्वसु

सुते आदित्यानां स्वासृस्तथा ॥ सर्वदेवात्मिके एस्यां नैम्यहं त्वं प्रसीद
मे ॥ मंत्रेणानेन त्वा गां पुछलोमानि दात्रतः भव्यानि छेदयेद्विप्रः पवित्रा
र्थे शुभानि च ॥ गो पुछै रोमकैर्दर्भैः पवित्रकरणक्रमं ॥ आख्यातोनंतरं
वक्ष्मि कूर्चस्य करणक्रमं ॥ नवभिः सप्तभिर्दर्भैः पंचभिः क्रमशः कृतः
कूर्चः श्रेष्टो मध्यमश्च कनीयश्च इतिरितैः ॥ तदंप्रि द्व्यंगुलं ज्ञेया
तदूर्ध्वं चतुरंगुलं ॥ षोडशांगुलमायामा मध्यस्तां च नियोजयेत् ॥
पवित्रप्राग्यथाप्रात्तो ग्रंथिस्तेन क्रमेण तु ॥ ग्रंथिदद्याद्विजोक्तः कूर्चे

Indira Gandhi National
Centre for the Arts

पचगव्येचयो
तद्विध्यास्यात् आसने देवतादीनापि चरत्नानि वारिणि
गेच द्विजः कूर्चंप्रयोजयेत् अमृतेषु च गव्येषु पंच सुत्रौ तकर्मणि॥
४९ गेच द्विजः कूर्चं प्रयोजयेत् अमृतेषुचगव्येषुपंचसुत्रौतकर्मणि॥
पुण्योदकुंभ तोयषु द्विजः कूर्चंप्रयोजयेत् प्रागग्रमुदगग्रं वास्थाप
येत् कूर्चमासनं॥ कूष्यपे देवतार्षं च पित्र्यर्पं दक्षिणाग्रकं॥ इति॥
अन्यत्तु॥ अंगुष्ठपर्वये दूर्ध्वे तर्जन्यां तु पुनः पुनः॥ ज्ञानमुद्रामधः कृ
त्वा कूर्चं च ग्रंथितं रिष्यतौ॥ एतत्पवित्रं प्रशंसंति॥ कात्यायनः वज्रं
यथासुरेंद्रस्य शूलं हस्ते हरस्य च॥ चक्रायुधं यथा विष्णोरेवं विप्रक

रे कुशः भूतप्रेतपिशाचाश्च ये चान्ये ब्रह्मराक्षसाः विप्रांगुलिकुशा
न् दृष्ट्वा दूरं गच्छंत्वधोमुखाः हारीतः जपे होम हव्य ह्येते असुरादि
स्वरूपिणः पवित्रकृतहस्तस्य विद्रवंति दिशो दश॥ गोवालपवित्रंप्र
शंसति॥ कौशिकः गवां वालपवित्रेण संध्योपास्तिं करोति यः स वेद्या
दश वर्षाणि कृतसंध्यो भवेन्नरः गवां वालपवित्रेण नस्युपास्तिं करो
ति यः पंचाग्नयो हुतास्तेन यावज्जीवं न संशयः एतत्सार्वकालिकोप
लक्षणार्थं॥ तथा चोक्तं नैरुक्त॥ गवां वालपवित्रे तु धार्यं धार्यमाणे तु

Indira Gandhi National
Centre for the Arts

नित्यशः न स्पृशंति हपापानि शिखामात्रेनुतिष्ठति विष्णुः गोवाले च कुशाग्रे

५० च पवित्रे रुक्मसंयुतं धारयेदिति शेषः सर्वकाले हेम पवित्रस्य दोषो

नास्तित्यह॥ शौनकः हैमे न स र्क दोस वांन्कुर्याद्वा विचारयेत्

॥ हेमपवित्र प्रशंसा॥ हेमाद्रौ॥ अन्यानि च पवीत्राणि कुशदूर्वामिका

नि वा॥ हेमात्मक पवित्रस्य एकांनाहेति त्रैकल्नो॥ कात्यायनः हरिता

यज्ञियादर्भाः पीतकापाकयज्ञियः समूलाः पितृदेवात्याः कल्माषा

वैश्वदेवकाः नीवीमध्येस्थितादर्भा ब्राह्मसूत्रे च ये ‾ ताः पवित्रा

स्तांश्चिजानीयाद्यथा कायस्तथा कुशः स्मृति चंद्रिकायां॥ करेकं

कंठे शिखायां च कर्णयोरुनयोरपि॥ पवित्रं कोय स्व न स पापेन

लिप्यते॥ कुशमावातुपः कर्णे स मावहति सर्वदा॥ लिप्यते न स पा

पेन पद्मपत्र विवा नसा॥ वर्णेनेदेन पवित्र दर्भसंख्या क्ता॥ स्मृति

भास्करे॥ सप्तभिर्दर्भपिंजु कुर्याद्ब्रह्मपवित्रकं॥ पंचभिः क्षत्रिय

स्यैव चतुर्भिश्च तंथा विशः द्वाभ्यां शूद्रस्य विहितं आंतराणां तथैव च

॥ आंतराणां अनुलोमानां॥ इति दर्भविधिः अथ स्नानविधि। तत्र कु

Indira Gandhi National
Centre for the Arts

मेपुराणे॥प्रक्षाल्यदंताकाष्ठैर्वैभक्षयित्वायथाविधि॥आचम्यप्रयतोनित्यंप्रा
५१ :स्नानंसमाचरेत्॥व्यासः॥उषःकालेतुसंप्राप्तेकृत्वाचावश्यकंबुधः॥स्नाया
न्नदीषुशुद्धासुशौचंकृत्वायथाविधि॥दक्षोपि॥अस्नात्वानाचरेत्कर्मजप
होमादिकिंचन॥लालास्वेदसमाकीर्णःशयनादुत्थितःपुमान्॥ अत्यंतमलिनः
कायोनवछिद्रसमन्वितः॥स्रवत्येवदिवारात्रौप्रातस्नानंविशोधनं॥प्रात
स्नानंप्रशंसंतिदृष्टादृष्टफलंहितत्॥सर्वमर्हतिशुद्धात्माप्रातस्नायीजपा
दिकं॥प्रातस्नानेविनाकर्मणिअधिकारोनास्तिअतःकारणात्॥ह

रिहरकृतत्रिकंडिकासूत्रभाष्येएवस्नानविधिरित्येतत्सूत्रव्याख्या
याशक्तस्यसविस्तरंमध्याह्निकस्नानवत्॥अशक्तस्यसर्वांगेशुष्क
भस्मलेपनरूपभस्मादिस्नानानिअग्निहोत्रिणःहोमलोपभयात्
संक्षिप्तस्नानविधिःजटिलादीनांचस्नानप्रकारःसम्यक्लिखितोस्ति
तेनैवप्रकारेणप्रातःस्नानंकृत्वासंध्योपासनंकुर्यात्॥शक्तस्यउष्णो
दकस्नाननिषेधः याज्ञवल्क्यः वृथातूष्णोदकस्नानेवृथाजाप्यमवैदि
कं॥वृथात्वश्रोत्रियदानंवृथाशुक्तापसाक्षिकं॥वर्जेदिनित्युष्णोदकस्ना

Indira Gandhi National
Centre for the Arts

नेनिषेधयति॥यमः अमावास्यांरवेवीरेऽर्कं।राहुदर्शने उष्णोदकेन चेत्स्ना

५२ पादं धुमित्रकुलक्षयः वहुनुरपि॥मृतेजन्मनिसंक्रांतौश्राद्धे जन्मदिने तथा॥

अस्पृश्यस्पर्शनेचैवं नस्नायादुष्णवारिणा॥इत्यादि उष्णोदकविचारः ग्रंथां

तरे वहुलिखितोस्तिद्रष्टव्यः अथप्रातसंध्याविधिः अत्रिः संध्यात्रयंतुक

र्तव्यं द्विजे नात्मविदासदा॥प्रजापतिः उपास्यादिनमारभ्यसायंप्रातश्च

कालयोः मध्याह्नेपिचकर्तव्यंपापवत्प्राण विमोचनात्॥यम॥संध्यामु

पासतेयेतुसततं शंसितव्रताः विधूतपापासे यांतिब्रह्मलोकंसनातनं॥

संध्यामाहात्म्यं ग्रंथांतरेये येछमवलोकनीयं विस्तरं नः यादत्र नलिखितं॥

पराशरमाधवे॥प्रातःसंध्यांसनक्षत्रां मध्यमांस्नानकर्मणि॥सादित्यांपश्चिमां

संध्यांमुपासीतयथाविधी ति॥स्नानकर्मणीतिमाध्याह्निकस्नानानंतर

मित्यर्थः माध्याह्निकसंध्यायाः गौणकालमदक्षः अध्यर्धयामादासायंसं

ध्यामाध्याह्निकीष्यते॥पुराणे॥उपास्यपश्चिमांसंध्यां उपक्रम्ययथाविधि

॥गायत्रिमभ्यसेतावत् यावदादित्यदर्शनात्॥तत्रापिकालविशेषउच्य

ते॥अग्निस्मृतौ॥संध्याकाले: प्रागुदयाद्विप्रस्यद्विप्रमुहूर्तकः॥रात्री

Indira Gandhi National
Centre for the Arts

५३ पस्य तदर्धंस्यात दर्धंस्या द्विशोप्यस॥ तथैवास्तमिते तेवांवेस्यानादीनमयं
क्रमः अर्धास्तमदवेलादिसोयंनक्षत्रदर्शनात्॥ विप्रादीनां त्रयाणांतुसामांन्यमि
तिकेचन॥ कात्यायनकृतत्रिकं हि कांनाप्यस्नानदीपिकापद्य तौमध्या
ह्नसंध्यानंतरं गौणकालस्तुस्मृतिसारे॥ उदयात्प्राक्तनीसंध्या घटिका
त्रयंमुच्यते॥ सायंसंध्यात्रिघटिका अस्तादुपरिभास्वतः द्दशोमानेर
वौचैकमहश्येद्विमुहूर्तकं॥ संध्याकालेः सावेसेय स्तत्रसर्वंसमाचरे
दिति॥ अनुकल्पकाल उक्तो धर्मसारसुधानिधौ॥ उत्तमातारकोपेता

मध्यमालुप्ततारका॥ अधमासूर्यसहिताप्रातःसंध्यात्रिधामता॥ उ
त्तमासूर्यसहितामध्यमालुप्ततारका॥ कनिष्ठातारकोपेतासायंसंध्या
त्रिधामता॥ योगीयाज्ञवल्क्यः संध्यो संध्यामुपासीत नास्तंगेनोद्यते रवौ॥
तेनसंध्यावेवार्घदानं॥ पूर्वापरेयथाविचारेण नक्षत्रेषुसत्स्वेव उद्यतः
सूर्यस्य संध्यानंकृत्वा अर्घदानंकार्यं॥ नतूदये अर्घदानं॥ तेनसर्वेषां
आविरोधः॥ स्पष्टन्नृसिंहपुराणे॥ पूर्वासंध्यासनक्षत्रामुपक्रम्ययथा
विधि॥ गायत्रीमभ्यसेतावद्यावदादित्यदर्शनं॥ अतएव अर्घदानं॥ त

Indira Gandhi National
Centre for the Arts

५८ त्रैव अर्घजलैर्मंदेहानामराक्षसवधरूपफलश्रुतेः आशौचेतन्मात्रोक्तेः श्रौत
त्वाच्च मंदेहानामराक्षसवधकथा तु नागदेवाह्निकप्रयोगपारिजातादौ
द्रष्टव्या॥ आश्वलायनगृह्यसूत्रे॥ संध्यामुपासीत वाग्यतः सायमासी
नः उत्तरापरमुखो न्वष्टमदेशं सावित्रीजयेदर्धास्तमिते मंडले आनक्ष
त्रदर्शनाद्देवताप्राः प्रतमुखस्तिष्ठन्नामंडलदर्शनात्॥ उत्तरापरमुखो
वाव्यानिरवः नेतत्र तन्नक्षत्रेषु सत्सु अर्घदानं॥ एतदर्थे पशशरमाधवस्पसे
मतिः पूर्वं उक्तैव अस्ति॥ तैत्तिरीयश्रुतौ॥ तदु ह वा एते ब्रह्मवादिनः प्र

वोभिमुखः संध्यायां गायत्र्याभिमंत्रिता आप ऊर्ध्वं विक्षिपंतीत्याद्युक्त्वा
पद्मदर्णं प्रक्रमेत्ति तेन पाप्मानमवधून्ये त्सूद्यंतमस्तं यंतमादित्यम
भिध्यायन्कुर्वन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुते ऽसावादित्यो ब्रह्मेति
॥ इति तैत्तिरीयश्रुतिपठितत्वात्संध्यायाः श्रौतत्वं॥ लक्षणया गायत्री
मंत्रप्रतीपाद्यः सवितैव संध्येत्यनुसंधेयं॥ तस्यैव नामत्रयस्य पत्रपंचस्म
त्ये तरेस्मृतेः प्रातः काले तु गायत्री सायंकाले सरस्वती॥ मध्यंदिने च
सावित्री उपास्या नामेदतः गायत्री हमवेद्रक्ता सावित्री शुक्लवर्णिका॥ स

Indira Gandhi National
Centre for the Arts

५५ रस्वतीतथारूपाउपास्या वर्णभेद तः॥ गायत्रीब्रह्मरूपीतुसावीत्रीरुद्ररूपी
णी॥सरस्वतीवीष्णुरूपाउपास्यारूभेदतः उदयेब्रह्मतुमध्यानेतुमहे
श्वरः॥सायाह्ने विष्णुरूपा वैत्रैणीमातीदिवाकरे॥उपासीतेतिशेषः॥
उपासनंचात्रध्यानं॥वा चंब्रह्मेत्युपासीतेतिदर्शनात्॥तैत्तिरीयब्राह्म
णमपी॥उद्यन्तमस्तंयन्तमादित्यमभिध्यायन् ब्राह्मणोविद्वान्सक
लंभद्रमश्नुते॥सावादित्यो ब्रह्मेति॥ब्रह्मैवसन्ब्रह्माप्येतियएववेद
ति॥अघमर्षः वक्षमाणप्रकारेणप्राणायामादिकं कर्मकुर्वन्नघो

क्तनामवर्णरूपोपेतंसंध्यासद्यानित्वंम्यमसदित्वंब्रह्मेति कालत्रयेपियथा
क्रमेणाभिध्यायनयेहिकामुष्मिकं चसकलंभद्रमश्नुते॥एएवमुक्तध्या
नेनशुद्धांतःकरणोब्रह्मसक्षात्कुरुते॥सपूर्वमपिब्रह्मेवसन् अज्ञाना
त्जीवत्वंप्राप्तोयथोक्तज्ञानेनतदज्ञानापगमेब्रह्मेवप्राप्नोतीती॥अत
एवव्यासः॥नभिन्नांप्रतिपद्येतगायत्रींब्रह्मणासह॥सोहमस्मीत्युपा
सीतविधिनायेनकेनचिदिती॥अथशंकराचार्यकृतोगायत्रीमंत्रभा
ष्यंलिख्यते॥अथास्यसर्वदिवात्मनःसर्वसक्तेःसर्वावभासकतेजोम

Indira Gandhi National
Centre for the Arts

५६ यस्यपरमात्मनःसर्वात्मकत्वद्योतनार्थंसर्वात्मकत्वंप्रतिपादकगायत्रीमहा
मंत्रस्योपासनप्रकारःप्रकाश्यते॥तत्रगायत्रीप्रणवादितप्तव्याहृत्युपेता
शिरःसमेतांसर्ववेदसारंवदंति॥एवंविशिष्टागायत्रीप्राणायामैरुपास्या॥
सप्रणवव्याहृत्युपेताप्रणवांतागायत्रीजपादिभिरुपास्या॥तत्रशुद्धगाय
त्रीप्रत्यग्ब्रह्मैक्यबोधिका॥धियोयोनःप्रचोदयादितिनोऽस्माकंधियोबु
द्धीयःप्रचोदयात्प्रेरयेदितिसर्वबुद्धिसंज्ञांतःकरणप्रकाशकःसर्वसाक्षी
प्रत्यगात्मेत्युच्यते॥तस्यप्रचोदयाच्छब्दनिर्दिष्टस्यात्मनःस्वरूपभूतंपरं

ब्रह्मतत्सवितुरित्यादिपदैर्निर्दिश्यते॥तत्रॐतत्सदितिनिर्देशोब्रह्मण
स्त्रिविधःस्मृतइतितच्छब्देनप्रत्यग्भूतंस्वतःसिद्धंब्रह्मोच्यते॥सवि
तुरितिसृष्टिस्थितिलक्षणकसर्वप्रपंचस्यसमस्तदेवताविग्रहस्याधी
ष्ठानेलक्षणं॥वरेण्यमितिसर्ववरणीयंनिरतिशयानंदरूपं॥भर्गइत्य
विद्यादिदोषभर्जनात्मकज्ञानैकविषयत्वं॥देवस्येतिसर्वद्योत
नात्मकाखंडचिदेकरसं॥सवितुर्देवस्येत्यत्रषष्ठ्यौराहोःशिरोव
दौपचारिकःबुद्ध्यादिसर्वदृश्यसाक्षिलक्षणंयन्मेस्वरूपंतत्सर्वो

Indira Gandhi National
Centre for the Arts

५८ धिष्ठानभूतं परमानंदनिरस्तसमस्तानर्थरूपस्वप्रकाशचिदात्मकं ब्रह्म
त्वेवं धीमहि ध्यायेमाएवं सति सह ब्रह्मणा स्व विवर्तजगत्प्रपंचस्य जगु सर्व
स्यपेनापवादसामानाधिकरण्यरूपमेकत्वसोपमिनिष्पाद्येनसर्व
साक्षिप्रत्यगात्मनो ब्रह्मणा सहतादात्म्यरूपमेकत्वं भवतिसर्वात्म
कब्रह्मबोधको येगायत्रीमंत्रः सप्रद्यो ते॥ सप्तव्याहृती नामयमर्थः
भूरितिसन्मात्रमुच्यते॥ भुवरितिसर्वं भावयतीतिव्युत्पत्याचिद्रूपत्व
मुच्यते॥ सुव्रीयतइतिव्युत्पत्वासवरितिसुष्टु सर्वैर्व्रियमाणं सुख
स्वरूपमुच्यते॥ महइतिमहीयंतेपूज्यतइतिव्युत्पत्यासर्वातिशयत्वमु
च्यते॥ जनइतिजनपतितिव्युत्पत्यासकलकारणत्वमुच्यते॥ तपइ
तिसर्वंतेजोरूपत्वांसत्यमितिसर्वबाधारहितं॥ एतदुक्तं भवति॥ ॥नो
केयत्सद्रूपंतदोंकारवाच्यंब्रह्मैव॥ आत्मनोस्यसाक्षिदूपस्यभावा
दिति॥ अध्यमसदय॥ ॥ सर्वेल्लोको ॐकारवाच्यब्रह्मात्मकानतद्व्य
तिरिक्तं किंचिदस्तीति॥ व्याहृतयोपिसर्वात्मकब्रह्मबोधिका॥ गा
यत्रीशिरसोप्ययमेवार्थः आपइत्याप्नोतीतिव्युत्पत्वाव्यापित्व

Indira Gandhi National
Centre for the Arts

५८ मुच्यते॥ ज्योतिरितिप्रकाशरूपत्वं॥ रसइतिसर्वातिशयत्वं॥ अमृतीमरणादि
संसारनिर्मुक्तत्वं॥ सर्वव्यापिकं सर्वप्रकाशकं सर्वोत्कृष्टं नित्यमुक्तं मा
त्मस्वरूपं॥ सच्चिदानंदात्मप्रणवोंकारवाच्यंब्रह्मतदहमस्मीतिगायत्री
मंत्रस्यार्थः॥ गुहायांब्रह्मकृतषानेहं कर्त्रेंदमंशाख्याहविर्दत्तं सत्॥ विन्नी
पत्तेनेदमहं नवानिषस्येप्रकारस्तु विनिंद्यतेत्र॥१॥ यदस्तियज्ञासि
तदात्मरूपं नान्यततो नातिनकिंचिदस्ति॥ स्वभावसंवित्प्रविनाविकेव
लोग्राह्यं गृहीतीतिमृषैवकल्पना॥२॥ इतिश्रीमच्छंकराचार्यभगवतः

कृतौगायत्रीभाष्यंसंपूर्णं॥ अथतैत्तिरीयश्रुतौनारायणोपनिषदि विहि
तत्रिकालसंध्योपासनमंत्राणां विचारस्पस्वामिमाधवकृतं भाष्यं लिख्य
ते॥ मध्याह्निकसंध्यानुष्ठाने अभिमंत्रीतजलपानार्थंमंत्रमाह॥ आपः
पुनंतुपृथिवींपृथ्वीपूतापुनातुमां॥ पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापु
नातुमां॥ यदुच्छिष्टमभोज्यंयद्वादुश्चरितंमम॥ सर्वंपुनंतुमामापोसतां
चप्रतिग्रहंस्वाहेति॥ या आपः संतिताः पृथिवींपुनंतु प्रक्षालनेन शोधयंतु साच
पृथिवीपूतात्राशुद्धासतीममानुष्ठातारंपुनातु शोधयेतु॥ तथाब्रह्मणोवे

Indira Gandhi National Centre for the Arts

५९ द्रस्यपतिः प्रतिपालकं आचार्यमेता आपः पुनंतु तेनाचार्येणोपदिष्टं ब्रह्मवेद
स्वरूपंपूता स्वयंपूतं सन्मां पुनातु ॥ अन्नंभुक्तावशिष्टरूपमुच्छिष्टंयदस्ति
तच्चाभोज्यंभोक्तुमयोग्यंतादृशं कदाचिन्मया भुक्तं यद्वा दुश्चरितं अन्यदपि
प्रतिषिद्धाचरणरूपं मम किंचित्संपन्नं तत्सर्वं परिहृत्येति शेषः ततो मापः पु
नंतु ॥ तथा ऽसतां शूद्रादीनां प्रतिग्रहं च मयाकृतं पुनंतु तदर्थमिदमभि
मंत्रितमुदकं स्वाहा ॥ मदीयवक्त्राग्नौ स्वाहुतं नमस्तु ॥ इति नारायणीये त्रयो
विंशोनुवाकः ॥ सायंसंध्याकाले जलपानार्थं मंत्रमाह ॥ अग्निश्च माम

---

तुश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यदह्ना पापमकार्षं मनसा
वाचा हस्ताभ्यां ॥ पद्भ्यामुदरेण शिश्ना अहस्तदवलुंपतु ॥ यत्किंचदु
रितं मयि ॥ इदमहं माममृतयोनौ ॥ सत्यज्योतिषि जुहोमि स्वाहेति ॥ योय
मग्निरस्ति यश्च मन्युः क्रोधाभिमानी देवः ये च मन्युपतयः क्रोधस्वा
मिनः तन्नियामका देवाः संति ते सर्वेपि मन्युकृतेभ्यः मदीयकोप
निष्पादितेभ्यः पापेभ्यो मां रक्षंतां पापिनं मां तत्पापविनाशनेन
पालयंतु किंचातीतेनान्हा तस्मिन्नहनि यत्पापमकार्षं कृतवान्

Indira Gandhi National
Centre for the Arts

६० नस्मिकेनसा। घनेनमनआदिभिः शिश्नांतेरवयवैस्तत्सर्वपा
पमहअवलुंपतु अहरभिमानीदेवो विनशयतु॥ परहिंसादिचिं
तनमानसंपापं अप्रियानृतादिभाषणं वाचिकं अभिचारहोमादिकं हस्त
कृतं पादेन गोब्राह्मणस्पर्शादिकं पादकृतं अभोज्यभोजनमुदरकृतं अगम्या
गमनं शिश्नकृतं अथवा किमनेन परिमितगणनेन यत्किमपि दुरितं मयि निष्पं
नं इदं पापजातं सर्वं तत्कर्त्तारं मां च लिंगशरीररूपं अमृतयोनौ मरणरहिते
जगत्कारणे सत्ये बाधरहिते ज्योतिषि स्वयंप्रकाशे वस्तुनि जुहोमि प्रक्षिपामि॥

अहमनेन होमेन तत्सर्वं भस्मीकरोमीत्यर्थः॥ तदर्थमिदमभि
मंत्रितं जलं स्वाहा मदीयवक्त्राग्नौ स्वाहुतमस्तु॥ इति नारा
यणीये चतुर्विंशोनुवाकः॥ ॥प्रातःसंध्याकाले जलपाना
र्थं मंत्रमाह॥ सूर्यश्च मा मन्युपतयश्च मन्युकृतेभ्यः॥ पापेभ्यो
रक्षंतां॥ यद्रात्र्या पापमकार्षं॥ मनसा वाचा हस्ताभ्यां॥ पद्भ्या
मुदरेण शिश्ना॥ रात्रिस्तदवलुंपतु॥ यत्किंच दुरितं मयि॥ इदम
हं माममृतयोनौ॥ सूर्ये ज्योतिषि जुहोमि स्वाहेति॥ सूर्यअहर्नि

Indira Gandhi National Centre for the Arts

ष्पादके सूर्योपाधिके॥ अन्यत्सर्वं पूर्ववद्व्याख्येयं॥ संध्या

॥६१ त्रये मार्जनजपानादर्धं गायत्र्या आवाहनमंत्रमाह॥ आयातु ॥६१

वरदा देवी अक्षरं ब्रह्मसंमितं॥ गायत्री छंदसां मातेदं ब्रह्म जुषस्व नः

ॐ ओजोसि सहोसि बलमसि भ्राजोसि देवानां धामनामासि विश्वमसि

विश्वायुः सर्वमसि सर्वायुः अभि भूरों गायत्रीमावाहयामीति॥

वरदा अस्मदभीष्टवरप्रदा देवी गायत्री छंदोभिमानिनी देवता

अक्षरं विनाशरहितं संम्यग्वेदैः तत्प्रमाणेन निश्चितं ब्रह्म जगत्

त्कारणं परतत्त्वमुद्दिश्य आयातु आगच्छतु अस्माकं ब्रह्मतत्त्वं

बोधयितुमागच्छत्वित्यर्थः॥ अयमेवार्थ उत्तरार्द्धेन स्पष्टीक्रियते॥ छंदसां गायत्र्यात्रिष्टबादीनां वेदानां माता देवानां गायत्री

गायत्रीशब्देनाभिधेयानोस्मानिदं ब्रह्म वेदांतप्रतिपाद्यं तत्त्वं

जुषस्व नो षस्व तदुपदिशत्वित्यर्थः॥ हे गायत्रिदेवि त्वमोजोसि॥

बलहेतुभूतनाष्टमधातुरूपासि सहोसि शत्रूणामभिभव

नशक्तिरसि बलमसि शरीरगतव्यवहारसामर्थ्यरूपासि भ्रा

जोसिद्यापृथिरूपासि देवानामग्नीन्द्रादीनांधामतेजोरूपमसि
॥६२॥ त्वं नामासि तद्देवतत्वनामेत्यर्थः विश्वं सर्वजगद्रूपं त्वमेव
वासि विश्वायुः सपूर्णायुःस्वरूपासि उक्तस्यैव व्याख्यानमिदं॥
र्वेभ्यभिभूः सर्वायुरिति अभिभूः सर्वस्य पापस्य तिरस्कारहेतु
रोंप्रणवप्रतिपाद्यपरमात्मासि तादृशं गायत्रीमदीये
मनस्यावाहयामि॥ इति नारायणीयोपनिषद्वि शौनकवाक्यं॥
गायत्र्या आवाहनादूर्ध्वं प्राणायामार्थं मंत्रमाह॥ ॐ भूः ॐ ॥६२
भुवः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यंभ

र्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्॥ ॐ आपो ज्योती
रसोमृतं ब्रह्म भूर्भुवःसुवरोमिति भूरादयः सप्त लोकप्र
तिपादिकाः सप्तव्याहृतयः तेषां च लोकानां प्रणवप्रतिपाद्यब्र
ह्मस्वरूपत्वविवक्षया प्रत्येकं प्रणवोच्चारणं तत्सवितुरित्या
दिको गायत्री मंत्रः तत्प्रतिपाद्यस्य ब्रह्मत्वविवक्षया तदा
दौ प्रणवोच्चारणं मंत्रस्य चायमर्थः सवितु प्रेरकस्यान्तर्या
मिणो देवस्य वरेण्यं वरणीयं श्रेष्ठं भर्गस्तेजो धीमहि ध्या

Indira Gandhi National
Centre for the Arts

यामः यः सविता परमेश्वरः नोस्माकं याधियो बुद्धिवृत्तीः प्रचोदयात्
॥ ६३ तत्प्रकर्षेण तत्त्वबोधे प्रेरयतु तस्य तेजो ध्यायेमेति पूर्वत्रान्वयः
आपो ज्योतिरित्यादिकोगायत्र्याः शिरोमंत्रः तस्यार्थं तयोः
प्रणवद्वयं पूर्ववदेव व्याख्यायंते या आपो नदीसमुद्रादिगताः सं
तियच्च ज्योतिरादि कर्मदीप्तियोपिर सोम धुरामृतादिः षट् [illegible] धो
स्तियद्रूपमूर्तं देवैः पार्थिव्यमस्ति तत्सर्वं ॐ प्रणवप्रतिपाद्यं ब्रह्मो [illegible] च भूः ६३
भुवः स्वरित्यभिहिता यत्र यो षद्दिश्रुयंते सव्याहृति सप्रणवां

गायत्रीं शिरसा सह॥ त्रिः पठेदायतप्राणः प्राणायामः॥ स उ
च्यते इति॥ ॥ इति नारायणीये सप्तविंशो नुवाकः॥ तस्मि
नेव प्राणायामविकल्पितं मंत्रांतरमाह॥ ॐ भूः भूवः सु
वर्महर्जनस्तपः सत्यं तद्ब्रह्म तदापआपोज्योतीरसोमृतं ब्रह्म
भूर्भुवः सुवरोमिति॥ पूर्ववद्व्याख्येय॥ इति नारायणीये ष्टा
विंशोनुवाकः॥ पुनरपि विकल्पितं मंत्रांतरमाह॥ ॐ तद्ब्र
ह्म॥ ॐ तद्वायुः॥ ॐ तदात्मा॥ ॐ तत्सत्यं॥ ॐ तत्सर्वं ॐ तत्पु

Indira Gandhi National
Centre for the Arts

शेर्नमइति॥ॐ प्रणवप्रतिपद्यं तत्सर्ववेदांतप्रसिद्धं ब्रह्मतत्वं
॥६४ ॥तथावायुःसूत्रात्मारूपो हिरण्यगर्भः ॐ तत्प्रणवप्रतिपाद्यं
तत्प्रतिद्धं ब्रह्मैव तथैवात्मजीवोप्योंतदितिपूर्ववत्पुरोःपुरा
णि स्थूलसूक्ष्मकारणशरीराण्योंतदितिपूर्ववत्तादृशायत्र
ह्मणेननोस्तुप्राणायामेशक्तितारतम्यमनुसृत्याविकल्पो
नमंत्रद्वयमुक्तं॥इतिनारायणीयएकोनत्रिंशोनुवाकः॥प्र
णादूर्ध्वं गायत्रीदेवतीया विसर्जनमंत्रमाह उत्तमेशिखरेजा ॥६४

तेभूम्यांपर्वतमूर्द्धनि॥ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासुखमि
ति॥भूम्यामवस्थितोयःपर्वतोमेरुनामकः तस्यमूर्धन्युपरिभागयदुत्त
मशिखरमस्तितस्मिन्नित्यंगायत्रीदेवतातिष्ठतितस्मात्कारणाद्देवि[illegible]
णेभ्यस्त्वदुपासकेभ्यस्त्वदनुग्रहेणापरिलब्धेभ्योनुज्ञानमभिव्यप्य
थासुखंस्वकायसुखमनतिक्रम्यस्वस्थानेतस्मिन्नुत्तमेशिखरेगच्छ॥इति
नारायणीयेत्रिंशोनुवाकः॥ ॥इतितैत्तिरीयश्रुतोसंध्योपासनमंत्र
भाष्यंसमाप्तः॥ ॥अर्घ्यप्रदानतःपूर्वमुपयेस्तमयेपिवा॥गायत्र्यष्टशत

जा पंप्रायश्चित्तं द्विजन्मभिः॥ कात्यायनस्तु॥ संध्याकाले व्यतिक्रांते जपं
॥६५॥ कुर्यात्प्रयत्नतः॥ ऋचं चैव तृचं जप्यात्ततः संध्यामुपासयेत्॥ पुनर्म्मै ॥६५॥
पुनः रायुर्म्मऽआगन्पुनः प्राणाः पुनरात्मामऽआगन्पुनश्चक्षुः पुनश्श्रो
त्रमऽआगन्॥ वैश्वानरो ऽदब्धस्तनूपाऽअग्निर्नः पातु दुरितादवद्या
त्॥१॥ ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रो
त्रं प्रपद्ये॥ वागोजः सहौजो मयि प्राणापानौ॥३॥ यन्मे छिद्रं चक्षुषो
हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु॥ शन्नो भवतु भु व

नस्य यस्पतिः॥२॥ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो नः प्रचो
दयात्॥३॥ संध्यात्रयस्यांतरं तम्येन देशविशेषमाह॥ व्यासः॥ गृहे त्वेकगुणा संध्या गोष्ठे द
शगुणा स्मृता॥ शतसाहस्रिका नद्यामनंतं विष्णुसन्निधौ॥ बहिः संध्या दशगुणा गर्त्ते
प्रस्रवणेषु च॥ ख्याते तीर्थे शतगुणा सहस्रा जाह्नवीजले॥ शातातपोपि॥ अनृतं म
द्यगंधं च दिवा मैथुनमेव च॥ पुनाति वृषलस्यान्नं बहिः संध्या ह्युपासिता॥ यदा उद्ध
रणाद्यंगलोपस्तदा गृह एव संध्यात्रयं कर्त्तव्यमित्याह॥ अत्रिः॥
॥ संध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा सदा॥ उभे संध्ये तु कर्त्तव्ये

ब्राह्मणैश्च गृहेष्वपीति॥ यद्यपि प्रशंसात्वाद्धिरेव संध्यात्रयं कर्तव्यत्वेन प्रा
॥६५॥ प्तं तथापि श्रौतत्वेन उद्धरणस्य प्राबल्यात्तदनुरोधेन सायंप्रातः संध्ये गृहेऽपि
वकर्तव्ये इति आज्ञा दीयते॥ ॥ अकरणे प्रत्यवायो दर्शितो दक्षेण॥ अध्या
स्ते यस्तु नो संध्यां ब्राह्मणो हि विशेषतः॥ स जीवन्नेव शूद्रः स्यान्मृतः श्वा चा
भिजायते॥ अध्यास्ते इत्यस्यार्थः॥ उक्तकाले संध्यां करिष्यामीति बुद्ध्या
अहोरात्रं कालानुसंध्यानरूपं अध्यासं करोति॥ संध्याहीनोऽशुचिर्नित्य
मनर्हः सर्वकर्मसु॥ यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत्॥ यथा स्ना

तं विना क्वापि अधिकारो नास्ति तथा संध्यावंदनं विनापि क्वापि अधिकारो
नास्ति अतः कर्मणि अधिकारार्थं पूर्वं संध्यावंदनं कर्मैव कर्तव्यं॥ नात्वन्य
त्॥ गोभिलोपि॥ संध्या येन न विज्ञाता संध्या येनानुपासिता॥ जीवमानो
भवेच्छूद्रो मृतः श्वा चाभिजायते॥ छंदोगपरिशिष्टे॥ कात्यायनः॥ सं
ध्यालोपस्य चाकर्ता स्नानशीलश्च यः सदा तं दोषा नोपसर्पंति वैनतेय
मिवोरगाः॥ तथा॥ एतत्संध्यात्रयं प्रोक्तं ब्राह्मण्यं यत्र अधिष्ठितं॥ यस्य

Indira Gandhi National
Centre for the Arts

नास्यादरस्तत्र न स ब्राह्मण उच्यते॥ विष्णुपुराणेपि॥ उपतिष्ठंति ये सं

॥६७॥ ध्यां येन पूर्वां न पूर्वां पश्चिमां॥ व्रजंति ते दुरात्मानस्तामिस्रं नरकं न

प॥ कूर्मपुराणेपि॥ योन्यत्र कुरुते यत्नं धर्मकार्ये द्विजोत्तमः॥ विहा

य संध्याप्रणतिं स याति नरकायुतं॥ ॐ तदीश्वरध्यानव्यतिरिक्तविषयं॥ ए॥ ३४

॥ तथा च व्यतिरेकेणोक्तं॥ पुराणे॥ मत्कर्म कुर्वतां पुंसां कर्म लोपो

भवेद्यदि॥ तत्कर्म ते प्रकुर्वंति तिस्रः कोट्यो महर्षयः॥ मत्क

र्म कुर्वतां मम ध्यानपरायणानां॥ तथा विश्वामित्रादिषु दृष्ट

त्वाच्च॥ गायत्रीहृदये तु॥ गायत्रीं च जपन्विप्रो वेदान्सांगानधी

तवान्॥ गायत्र्या हीनवेदाश्च सांगा अपि हि निष्फलाः॥ एतत्सर्व

मनार्त्तविषयं॥ तथा च॥ याज्ञवल्क्यः॥ अनर्त्तश्चोत्सृजेद्यस्तु स वि

प्रः श्रुद्रसंमितः॥ प्रायश्चित्ती भवेद्देवलोके भुवि विनिंदितः॥ अत्रिर

पि॥ नोपतिष्ठति यः संध्यां स्वस्थानस्थास्त्वचे द्विजाः॥ हिंसंति वै म

हापापाः पापा भगवंतं दिवाकरं॥ गायत्री माहात्म्य॥ गायत्रीकल्पे॥

Indira Gandhi National
Centre for the Arts

गायत्रीं चैव वेदांश्चतुलयन्॥ एकतश्चतुरो वेदान्षडंगान्सप
॥६८॥ दक्रमान्॥ एकतश्चैक गायत्रीं तुल्यरूपा तु सा स्मृता॥ साय।
णीये॥ यम॥ गायत्र्या न परं जाप्यं गायत्र्या न परं तपः॥ गायत्र्या
न रं ध्यानं गायत्र्या न परं हुतं॥ सूत उवाच॥ सायं प्रातश्च यः संध्या
मुपास्ते शुद्धमानसः॥ जपन्हि पावनीं देवीं गायत्रीं वेदमातरं॥ तया
संभावितो देव्या ब्राह्मणो धूतकिल्बिषः॥ न सीदेत्प्रतिगृह्णानोऽपि पृ
थ्वीं ससागरां॥ सूतके संध्यावंदन विचारः॥ भरद्वाज॥ सूतके म

तके कुर्यात्प्राणायाममसंत्रकं॥ तथा मार्जनमंत्रांश्च मनसोच्चार्यमीतये
त॥ गायत्रीं सम्यगुच्चार्य सूर्यायार्घं निवेदयेत्॥ मार्जनं तु न वा कार्य
मुपस्थानं न चैव हि॥ अत्र दशसंख्याकं गायत्रीजपं कुर्यात्॥ आपन्ना
श्चाशुचिकाले तिष्ठन्नपि जपेद्दश त्याश्वलायनाचार्येणोक्तत्वात्॥ इ
ति सूतके संध्यावंदन विधिः॥ आपत्काले संध्यावंदन विधिः॥
संग्रहकारः॥ मद्ध्योभेन पश्चोभयो गार्त्ते शावनुकौ सूतके॥ संध्या
वंदनविधिस्तिर्न दोषाय कदाचन॥ एतत्संगानूष्ठान विपर्य

Indira Gandhi National
Centre for the Arts

॥अग्निस्मृतावनुकल्पविधिस्मरणात्॥ तदुक्तं॥ जलाभावे महामार्गे वं
॥६७॥ धने म्बप्रचावपि॥ उभयोः संध्ययोः काले रजसा वर्ध्यमुत्क्षिपेत्॥ तदभा
सूर्यध्यानमेव कर्त्तव्यमिति॥ महाभारते व्यासः॥ तेन थैवमहाराज दंशिता
रणमूर्ध्वनि॥ संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे॥ दंशिताः सन्नद्धाः
॥संधिर्मौगतं संध्यागतं॥ इति त्वापत्कालकर्तव्यसंध्यावंदनविधिः॥
॥ ॥अथ संक्षिप्त॥ प्राणापानविधिः॥ सर्वकर्मारंभे अधिकारार्थं तत्राह॥ ॥ ॥
वृधमनुः॥ प्राणायामान्कुर्वीत सर्वकर्माणि संतपः॥ प्राणायामैस्त्रिभिः पूत ॥६९॥

स्ततः ॐकारमर्हति॥ प्राणायामलक्षणं रुद्रकल्पद्रुमे स्नानदीपिकायां आचारार्के
प्रयोगपारिजाते मिताक्षरादौ द्रष्टव्यं॥ त्रिकंडिकाभाष्ये स्नानदीपिकायां॥ वामेन
दक्षिणेन वा वायोः पूरणमुभयमपि शास्त्रार्थः अनेनैव वायुपूरणविकल्परूपशा
स्त्रार्थेनैव प्रथमप्राणायामे एकः॥ शास्त्रार्थः द्वितीयप्राणायामे अन्यः शास्त्रार्थः
एवं शास्त्रार्थविपरीत्येन संततप्राणायामत्रयकरणेपि अनुलोमविलोमसिद्धिर्भ
विष्यति॥ अयमेव अनुलोमविलोमप्रकारः प्रयोगे स्पष्टो भविष्यति॥ त्रिष्वपि एकेनै
व आकृष्य अन्यनरेचनं कुर्यादिति केचिदिकमलाकराह्निके॥ प्रयोगपारिजाते

Indira Gandhi National
Centre for the Arts

७ कंमूलंन्न दृश्यते अतःकारणात् स वैदिको न भवतीति शिष्टैः अनुमीयते। शोधकेन तस्यापि मूलमनु
तास्मृतिः शोधनीया इति सज्जनान् प्रति प्रार्थना॥ वैदिकप्राणायामस्य मूलवाक्यविशेषस्तु पूर्वं
॥कुंभजपविधिमाह॥ पारखः॥ दक्षिणे रेचकं कुर्यात् वामेनापूर्य चोदरं॥

॥१०॥ कुंभकेन जपं कुर्यात् प्राणायामस्य लक्षणं॥ अत्र कुंभके जपविधान
सामर्थ्यात् नासिकाद्वयं रुध्वा दशप्रणवसहित गायत्रीमंत्रस्य आवृ
त्तित्रयं कुंभके एव कुर्यात्॥ पूरकरेचकौ तूष्णीं॥ इत्येकः प्राणायामः
॥एवमेव मंत्रसहितो द्वितीयः॥ एवमेव मंत्रसहितस्तृतीयः एवं नवावृ
त्तिभिस्त्रयः प्राणायामा भवंति॥ अयं वैदिकः प्राणायामः सर्वशिष्टसम्मः
तः॥ आचारादर्शे पूरककुंभकरेचकेषु जपो विहितोस्ति तत्र स्मृतिवा

त्तिखित रुद्रकल्पद्रुमादि ग्रंथेषु सविस्तरः अस्ति तद्विशेषा
नुसारी प्रयोगोपि संध्यायां लेखयिष्यामि॥ ॥ प्रातःस्नाना
नंतरं कृत्यमाह हरिहरोक्त प्रकारेण स्नानं कृत्वा दीपिकोक्त
प्रकारेण प्रातरुपगोपनपूर्वकं वस्त्रोत्तरीयपरिधानं कृत्वा द्विराचमनं
॥मृदा ऊरू करौ सक्षक्ष प्रक्षाल्य॥ अथस्नानानंतरं धार्यो ऊर्ध्वपुंड्रत्रिपुं
ड्रविधिरभिधीयते॥ तस्य तावत् आवश्यकत्वमाह॥ आश्वलायनाचा
र्यः॥ अपवित्रेण यज्जप्तमस्नातेन कृतं हुतं॥ यच्च शून्यललाटेन त

॥बै॰॥ दृत्सत्यफलं लभेत्॥ ततः शिष्टाचारप्राप्तं तीर्थमृत्तिकया तिलं
कं भस्मना वा त्रिपुंड्रमुभयं वा यथा वा श्रद्धया कुर्यात्॥ मृत्ति
॥७१॥ का चंदनं भस्म तोयं चैव चतुर्थकं॥ एभिर्द्रव्यैर्यथाकालं ऊर्ध्वपु
ण्ड्रं पुंड्रं भवेत्सदा॥ जले नो ऊर्ध्वपुंड्र धारणा कालस्तावत्तत्तलाकर्मा
र्हनानंतरं आवस्त्रपरिधानात्॥ तैलस्यानधिकारात्॥ तत्र
योग्यमृत्तिका उच्यते॥ भगवता पर्वताग्रेन दीतीरे मम क्षेत्रे विशे ॥वै॥
षतः॥ सिंधुतीरे च वल्मीके तुलसीमूलमाश्रिताः॥ मृद एतास्तु ॥१॥

ला द्धारये द्विजः॥ अत्र स्थानविशेषेणाकृतिविशेष उच्यते॥ वि
ष्टिले बाहुवक्षे चैव दंडवत्तु कर्णपार्श्वे भवेत्। हृदये कमलाकारमुद
रं दीपवल्लिखेत्॥ वेणुपत्रसमाकारं बाह्वोर्मध्ये लिखेत्सुधी
॥ अधः पृष्ठे स्कंधदेशे लिखेत्तु जबपालाशावत्तावत्त्रांगुलि
॥ अंगुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत्॥ अ
नियम उच्यते अंगुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत्॥ अ
नामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी॥ एतैरंगुलिभेदैस्तु का
रयेन्न नखैः स्पृशेत्॥ तत्र विशेष उच्यते॥ स्मृतिरत्नावल्यां॥ सदर्भे

७ति॥ तद्विशेषउक्तः॥ स्मृतिसंग्रहे॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा मध्येशून्य प्रधारयेत्॥ शृणु षण्मुख तन्मध्ये उमयाहं श्रिया हरिरिति॥
एतदावश्यकमित्याह भगवान्॥ मत्प्रियार्थं शुभार्थं वा रक्षार्थं चतुरानन॥ मद्भक्तो धारयेन्नित्यं ऊर्ध्वपुंड्रं नरः सदेति॥

॥आ०॥ ॥न तु हस्तेन यः कुर्यात्तिलकं बुधः॥ आचम्य स विशुद्ध्यतदर्भस्यागेन

॥७३॥ च वहि॥ चंद्रिकायां ब्रह्मांडपुराणे॥ ललाटे केशवं विद्यान्नारायणमथोदरे
॥माधवं हृदि विन्यस्य गोविंदं कंठकूपके॥ उदरं दक्षिणे पार्श्वे विष्णुरित्यभिधीयते॥
यते॥ तत्पार्श्वे बाहुमध्ये तु विन्यसेन्मधुसूदनं॥ त्रिविक्रमं कर्णमूले वामे कुक्षौ तु वामनं॥
नं॥ श्रीधरं बाहुके वामे हृषीकेशं तु कर्णके॥ पृष्ठे तु पद्मनाभं तु ककुद्दामोदरं स्मरेत्॥
द्वादशैतानि नामानि वासुदेवेति मूर्धनि॥ पूजाकाले च होमे च सायंप्रातः समाहितः॥
नामान्युच्चार्य विधिना धारयेदूर्ध्वपुंड्रकं॥ संकर्षणादिभिः कृष्णे शुक्ले वा केशवादिभिरि
तस्य फलमाह स एव ततः॥ ऊर्ध्वपुंड्रोमृदा शुभ्रो ललाटे यस्य दृश्यते॥ स चंडालोपि शुद्धात्मा पूज्य एव न संशयः॥ अन्यच्च॥
अशुचिर्वाप्यनाचारो मनसा पापमाचरेत्॥ शुचिरेव भवेन्नित्यं ऊर्ध्वपुंड्रांकितो नरः॥ स्मृतिसारसमुच्चये॥ गोपीचंदन ७

यं
लिप्तांगो यं पश्यति चक्षुषा॥ तं तं शुद्धं विजानीयान्नात्र कार्या
विचारणा॥ अकरणे प्रत्यवाय उक्तस्तत्रैव॥ ऊर्ध्वपुंड्रविहीनस्य श्म
शानसदृशं मुखं॥ अवलोक्य मुखं तस्य चादित्यमवलोकयेत्॥ किंते
न ज्ञानमात्रेण भूत्वा रेणाल्लशत्रुणा॥ जो जातो नार्चयेद्विष्णुं नस्म
रन्नापि कीर्तयेत्॥ इत्येतद्भगवानाह ब्रह्मणे ब्रह्मवादिने॥ मद्भ
क्ता होमकाले च सायंप्रातः समाहितः॥ मद्भक्तो धारयेन्नित्यं ऊर्ध्व
पुंड्रं विना तु तत्॥ यत्कर्म कारयेन्नित्यं तत्सर्वं निष्फलं भवेत्॥ प्रक्षा

Indira Gandhi National Centre for the Arts

दसंहितायां॥ तुलसीकाष्ठसंभूतया मालां वहते नरः॥ प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विग्रहे॥ यत्ने॥ ॥ न जसीं तुलसीमालां धात्री
११७४॥ मालां विशेषतः॥ महापातकसंहर्त्री धर्मकामार्थदायिनी॥ न पादुकस्यो नादर्शनजलेप्यवलोकयन्॥ न पावृतशिराः कुर्यात्तिलकं धर्मसाधनं तथा॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा उभयं धारयेद्द्विजः॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं स्यात्त्रोर्ध्वपुंड्रं त्रिपुंड्रकं॥ तथा न सूतके नच आद्ध्येनभ्यंगेनच शूद्रतः॥ गोपिचंदनलेपं तु ने कार्यमनुरब्रवीत्॥ कात्यायनगृह्यसूत्रेनाप्यगधरे॥ अभ्यंगे सूतके चैव विवाहे पुत्रजन्मनि॥ मांगल्येषु च सर्वेषु न धार्यं गोपिचंदनं॥ अथ शंखचक्रधारणविधिमाह सायणीयेषां खः॥ शंखचक्रौ चंकनं तु तुलसीदलभक्षणं॥ यः कुर्यान्नियमं नित्यं स पापैः परमां तिं॥ नान्यदेवं नमस्कुर्यान्नान्यदेवं निरीक्षयेत्॥ चक्रांकितः सदा तिष्ठेन्मद्भक्तः पांडुनंदनेति॥ आश्वलायनाचार्यस्तु॥ शिवकेशवयोश्चिह्नान् चक्रशूलादिकान्नूद्विजः॥ न धारयेत्मतिमान् वैदिके वर्त्मनि स्थित इति॥ अत्र वृद्धाचारतो व्यव

स्मृ

स्याद्दृष्टव्या॥ इति शंखचक्रधारणविधिः॥ गोपिचंदनेन ऊर्ध्वपुंड्रं भस्मना
॥७५॥ त्रिपुंड्रं च स्नानदीपिकानुसारेण कुर्यात्॥ भस्मनो विशेषः॥ प्रयोगपारिजा
ते॥ तद्भस्मधारणे अधिकारि उक्तः॥ संग्रहे॥ शैवागमोक्ताश्रमविनिष्ठमान
सस्त्रिपुंड्रचिह्नं तु सदैव धारयेत्॥ तदुक्तमंत्रेण ललाटमध्ये॥ तदा--णे वसिते
न भस्मना॥ एतत्सर्वागमविषयं॥ तथा चोक्तं तत्रैव॥ सर्वागमेषु निष्ठानां तत्त
न्मंत्रेण शस्यत इति॥ एतद्भस्मस्वरूपमुक्तं॥ तत्रैव॥ अग्निहोत्राग्निजं तद्वद्वि
रजाहोमजं तथा॥ औपासनसमुत्पन्नं समिदग्निसमुद्भवं॥ पचनाग्निसमुत्प

न्नं दावानलसमुद्भवं॥ भस्मानि षड्विधान्याहुः सर्वपापहराणि च॥ त्रैवर्णिकानां सर्वेषां अग्निहो
त्रसमुद्भवं॥ विरजानलजं चैव सुधार्यं भस्म कीर्तितं॥ औपासनसमुत्पन्नं धार्यं वै ब्रह्मचा
रिणां॥ शूद्राणां श्रोत्रियागारे पचनाग्निसमुद्भवं॥ अन्येषामपि सर्वेषां धार्यं दावानलोद्भवं
इति॥ तत्र देवता उच्यंते॥ ललाटे पृथिवी ज्ञेया हृदये जलदेवता॥ नाभावग्निर्गले वायुर्बाहुमूले
नभस्तलं॥ आदित्यो बाहुमध्ये तु मणिबंधे प्रजापतिः॥ विश्वेदेवाश्च साध्याश्च वसवोष्टावतः
स्मृताः॥ पृष्ठदेशे हरिः साक्षात्॥ शंभुं शिरसि विन्यसेत्॥ अत्र मंत्रांतराण्याह पुलस्त्यः॥ अ
ग्निरित्यादिभिर्मंत्रैः शुद्धं ब्रह्माभिमंत्रितं॥ शिवमंत्रेण तद्भस्म मंत्रेणाष्टाक्षरेण वा॥ गायत्र्या

Indira Gandhi National
Centre for the Arts

वाचेद्देवर्षैर्मंत्रेणैप्रणवेनवेति॥एतदावश्यकमित्युक्तं सापर्णीये॥त्रिपुंड्रकंसदाकुर्यान्मंत्र
॥७५॥ पूतेनभस्मना॥आगमोक्तेनमार्गेण शिवसायुज्यमाप्नुयादिति॥तत्प्रमाणमुक्तं स्मृति
रत्नावल्यां॥मध्यमानामिकांगुष्ठैरनुलोमविलोमतः॥प्रतिस्वल्पमनायुष्यमतिदीर्घंतपः
पे४ क्षयं॥नेत्रयुग्मप्रमाणेनत्रिपुंड्रंधारयेद्विजः॥तत्रविशेषउक्तः॥स्मृतिसंग्रहे॥धार्यंभस्म
त्रिसंध्यंतुगृहीणाजलसंयुतं॥सार्वकालंभवेस्त्रिणांयतीनांलवर्जितं॥वानप्रस्थस्यक
न्यानांदीक्षाहीनन्नृणांतथा॥मध्याह्नात्प्राक्जलैर्युक्तंपरतोजलवर्जितं॥मध्यांगुलिभि
त्रयेणैवस्वदक्षिणाकरस्यच॥त्रिपुंड्रं धारयेद्विप्रः सर्वकालमनाशनं॥अकारो

नामिकांगुलिरुकारोमध्यमांगुलिः॥मकारस्तर्जनीस्थानेत्रिभिरेवत्रिपुंड्रकं
॥ॐकारंप्रणवब्रह्मतद्विधादक्षरत्रयं॥तन्मूलाश्चत्रयोवेदाः ब्रह्म
सूत्रंतथैवच॥षडंगुले॥ प्रमाणेनब्राह्मणानांत्रिपुंड्रकं॥नृपाणां-चतु
रंगुल्यंवैश्यानांचद्व्यंगुलं॥शूद्राणांमध्यसर्वेषामेकांगुल्यंत्रिपुंड्रकं॥यतीनांविशेष
उक्तस्तत्रैव॥त्रियापुष्पेणमंत्रेणप्रणवेनयुतनच॥ललाटेपुंड्रकंचैवयोर्चयेद्भक्तिसं
यत॥त्रिपुंड्रधारयेन्नित्यंसन्यासाश्रममागतइति॥सच्छूद्रप्रत्युक्तंतत्रैव॥नमोन्ते
नशिवेनैवशूद्रः श्रुमक्तितःउद्धूलनंत्रिपुंड्रंचकैलेव्यंअद्युयातथा॥धि गभस्म

॥७७॥ नित्यं भक्त्या समाचरेत्॥ अन्येषामपि सर्वेषां विना मंत्रेण भक्तितः॥ ऊर्द्ध्व
न लिपुंड्रंच कर्त्तव्यं श्रद्धया तथा॥ धिग्भस्मरहितं भालं धिक् ग्राममशि
शिवालयं॥ धिगनीशार्चनं जन्म धिग्विद्यामशिवाश्रयां॥ त्रिपुंड्रं ब्राह्मणो
विद्वान्मनसापि न लंघयेदिति॥ तत्र विशेष उक्तः स्मृतिसंग्रहे॥ ऊर्ध्वपुंड्रं त्रिपु
ड्रं वा [illegible] मध्यशून्यं प्रधारयेत॥ शृणु षण्मुख तत्त्वेन येऽर्चयाम्यहं श्रियाहरिरि
ति॥ ब्रह्मांडपुराणे॥ त्रिपुंड्रधारणं नित्यं निप्राणां श्रुतिचोदितं॥ तस्माद्वेश्यामि
णामेव धार्यमेतं त्रिपुंड्रकं॥ सर्वेषामेव भूजानामघवर्गफलप्रदं॥

---

विप्राणां वेदविदुषां वेदोक्तेनानवादिना॥ संतनमन्मना कार्यं
त्रिपुंड्रं परमं हरेति॥ येषां वपुर्मनुष्याणां त्रिपुंड्रेणाभिवर्जितं॥ श्म
शानसदृशं तत्स्यात्प्रेक्ष्यं पुण्यकृज्जनैः॥ अद्य शांतजलेन च भस्म
ना च त्रिपुंड्रकं॥ यो धारयेत्स रक्षः ब्रह्मसंप्राप्नोति न संशयः॥ य
स्य शानुहरि तेत्यधरेण न विराजते॥ संसारसंभ्रमस्तस्य भस्महीं
नं शिवार्चनं॥ श्राद्धे यज्ञे जपे होमे वैश्वदेवे च कर्मसु॥ त्रिपुंड्रधार
ये द्यासौ विप्रो क्षपफलं लभेत्॥ न तद्दानं न तपो नं न तद्दानं नेतञ्जे

॥१८॥ यः॥ त्रिपुंड्रेण विनायेन विप्रेण यदनुष्ठितं॥ त्रिपुंड्रे ब्राह्मणोवि
द्विसनूमनस्यापिनस्तर्पयेत्॥ सुयतिद्धी तेयस्मात्तत्यागीपति
तो भवेत्॥ त्रिपुंड्रधारिणं विप्रयः श्राद्धे भोजयेद्द्विजः॥ पित
रस्तस्य तृप्तास्युमोदंते सुचिरं दिवि॥ यस्यापंक्तौ द्विजो भुंक्तेशि
वभक्तस्त्रिपुंड्रधृक्॥ सतापंक्तिः पुनात्येव सकलांचतुरानना त्रि
पुंड्रधारणात्पुण्यं नास्तीह भुवनत्रये। तस्मात्त्रिपुंड्रं संध्यायं
शुभकर्मणि कारयेत्॥ एवं भस्मविधिः॥ प्रोक्तः प्रेमात्खवचतु ॥१८॥

मुख॥ कृत्वैवं भस्मं यो भक्त्या धारयेल्लशिवं व्रजेत॥ स्मृतिसंग्रहे
पि॥ भाले त्रिपुंड्रकं भागलेरुद्राक्षमालिका॥ कक्षे षरक्षरो मंत्रः सरु
द्रो नात्र संशयः॥ भूतिर्भूतिकरी पवित्रपरमा पापौघविध्वंसिनी सर्वोप
द्रवनाशिनी परतरा सौम्यसंपत्करी॥ भूतप्रेतपिशाचराक्षसगणारिष्टार्तिस
रक्षणी साक्षान्मोक्षकरी फलप्रकटिता भूतिः सदा धार्यतां॥ ये भस्मधा
णत्स्मानाचानिंदमानवाः तेषां सुद्रेण संभूतिरनुमेण विपश्चिता॥ येभस्म
धारिणे क्रुद्धा नराः कुर्वीतितोतिषां चांडालतो जन्मसस्य गुर्वविश्चिता॥ चड
उन॥

Indira Gandhi National
Centre for the Arts

॥१९॥ लोप्यथवा शूद्रो भस्मनि प्रीतिमानमः ॥ सोनंतरे भवेद्विप्रो नात्र कार्या विचा
रणा ॥ ये भस्मधारिणां दृष्ट्वा परितुष्टा भवंति ते ॥ देवासुरमुनीन्द्रैश्च पु
ज्या नियनसंशयः ॥ सायणीयेनारदोपि ॥ त्रिपुंड्रं परमं पुण्यं ब्रह्मविष्णु
शिवात्मकं ॥ ये भूताराक्षसाः प्रेतास्तथान्ये क्षुद्रजंतवः ॥ त्रिपुंड्रधारिणं दृष्ट्वा
पलायंते न संशयः ॥ मद्यं पीत्वा गुरुदारांश्च गत्वा स्वर्णस्तेयं ब्रह्महत्यां च कृ
त्वा ॥ भस्मछन्नो भस्मशय्यासनस्थो रुद्रं ध्यायेन्मुच्यते पातकेभ्यः ॥ स्कं
ति भास्करेपि ॥ मासमात्रं सितं प्रोक्तं भस्म कल्मषभक्षणात् ॥ भूति ॥१९॥

भूतिकरी पुंसां क्षारं रक्षाकरं परं ॥ कात्यायनः ॥ श्राद्धे यज्ञे जपे होमे वैश्व
देवे सुरार्चने ॥ धृतत्रिपुंड्रः पूतात्मा मृत्युं जयति मानवः ॥ नृसिंहपुरा
णे ॥ सितेन भस्मना कुर्यात्त्रिसंध्यं च त्रिपुंड्रकं ॥ सर्वपापविनिर्मुक्तः ।
शिवेन सह मोदते ॥ इत्यकरणे प्रत्यवायश्चोक्तस्तत्रैव ॥ स्नानं शौचं च ज
पं होमं तीर्थं देवादिपूजनं ॥ तस्य व्यर्थमिदं सर्वं यस्त्रिपुंड्रं न धारयेत् ॥
इति क्रियासारे तु ॥ वामहस्ततले भस्म क्षिप्त्वाच्छाद्यान्यपाणिना ॥ अग्निरि
त्यादिमंत्रेण स्पृशन् भस्माभिमंत्र्य च ॥ अग्निरित्यादि भस्मानुमं

Indira Gandhi National
Centre for the Arts

॥८०॥ त्रेणमंत्रस्यापि प्पलादऋषिः गायत्री छंदः रुद्रो देवता भस्म
ध्यर्थे विनियोगः॥ ॐ अग्निरिति भस्म वायुरिति भस्म जलमिति
भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन एत
तानि चक्षूंषि भस्मानि॥ इति मंत्रेण अभिमंत्र्य ब्राह्मणः संध्यात्र
ये पश्चादेवं भस्म सर्वांगोद्धूलन पूर्वकं दीपिकानुसारेण मध्या
मुलित्रयेण वा चतुर्दशस्थानेषु गायत्रीमंत्रेण इष्टमंत्रेण वा धार
येत्॥ स्थानानि तु॥ प्रयोगपारिजाते॥ ललाटे हृदये नाभौ गलांसबा ॥८०॥

हु संधिषु॥ पृष्ठदेशे शिरस्येवस्थाने ष्वेतेषु धारयेत्॥ भस्मेति शेषः॥
भस्म धारणानंतरं हस्तद्वय प्रक्षालन जलं दक्षिणहस्त चुलके ग्
हीत्वा आपः पुनंतु पृथिवीत्रिमंत्रेण अथवा शिव षडक्षरेण ॐ कारे
ण वा पिबेत्॥ न तु तज्जले प्रक्षिपेत्॥ कुतः॥ जाबालोपनिषच्छ्रव
णात्॥ ब्रह्माण्डपुराणे॥ स्नात्वा पुंड्रं मृदा कुर्यात् हुत्वा चैव तु भस्मना॥ देवा
नभ्यर्च्य गंधेन सर्वपापापनुत्तये॥ ॥इति त्रिविधः॥ वैदिक क
र्मणि न तत्स्यादिनां अनावश्यकत्वं रुद्रकल्पद्रुमे॥ उत्तिष्ठतु महं

Indira Gandhi National
Centre for the Arts

॥९१॥ भूताद्याद्विमंत्राभ्यां वमपाहिर्निनाम्नो त्रिःप्रहस्मभूतासारणं
कुर्वंति॥ तन्नेत्यन्ये॥ अस्य तत्रोक्तत्वात्तांत्रिकेष्वेव मंत्रजपा
पादिष्वंगत्वं न वैदिकमंत्रजपाद्यंगत्वं प्रमाणाभावात्॥ यत्तु के
चिदत्राहुः॥ संकल्पानंतरं प्राक् न्यासेभ्यो भूतशुद्धिप्राणप्र
प्रतिष्ठामीत् कान्यासांश्च कुर्वंति॥ सर्वमंत्रजपाद्यंगत्वेन तंत्रे ॥९१॥
क्तत्वादिति तन्न॥ दह्यंते ध्मायमानानां धातूनां हि यथा मलाः॥
तथेंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहात्॥ प्राणायामैस्त्रिभिः

पूतस्तत्क्षणाज्ज्वलतेग्निवत्॥ यथा पर्वतधातूनां दोषान् दहति पा
वकः॥ एवमंतर्गतं पापं प्राणायामेन दह्यते॥ इति याज्ञवल्क्या
न प्राणायामैरेवेंद्रियगतदोषदहनप्रतिपादनद्वारा देहशुद्धिप्रतिपादनाद्वैदिकमंत्रज
पादियोग्यतायास्तैरेव सिद्धेः॥ अतश्च भूतशुद्ध्यादीनां वैदिकमंत्रपूजा
पांगत्वबोधकवैदिकप्रमाणाभावात् न वैदिकमंत्रेषु पूजाजपयोग्यता
[illegible]नकत्वं तेषां तांत्रिकाणां भूतशुद्ध्यादीनां तु तांत्रिकमंत्रपूजाजपांगत्वा
त्तांत्रिकेष्वेव मंत्रेषु पूजाजपयोग्यताजनकत्वम् अतश्च न वैदिकरुद्र
जपादिषु तद्योग्यताजनकत्वेन तेषाम[illegible]पेक्षास्ति॥ अत॥

Indira Gandhi National
Centre for the Arts

॥८२॥ वसंध्योपासनदौ भूतशुद्ध्यादीनामनाचरणं शिष्टानां ॥ अ
न्यथात आपि मूलशुद्ध्याद्यापत्तेः ॥ इत्यादिग्रंथः ॥ अत एव दे
माद्रौ महार्णवे देवयाज्ञिकपद्धतौ नारायणभट्टपद्धतौ च भूत
शुद्ध्यादिकं नोपन्यस्तं ॥ एवमेव संध्यादिषु तंत्रिकमुद्रान्यासध्याना
दीनामपि अपेक्षानास्तिरहस्य इच्छा स्व स्थान गृह्या परिशिष्टा अ
नुपवहरिहरभाष्यादौ संध्याप्रयोगेतौ त्रिकमुद्रान्यासादिकं न
लिखितं ॥ आसनान्याह ॥ व्यासः ॥ कशायं कंबलं चैव अजिनप
ट्टमेव च ॥ दारुजं ताल पत्रं वा आसनं परिकल्पयेत् ॥ तत्रैवका ॥८२॥

मनापरत्वनासनासुच्यते ॥ सर्वेषु णासनेषु कुशानुपरि धारयेत् ॥ ए
थ्वित्वयेथितिमंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छंदः ॥ कूर्मो देवता ॥ आस
नोपवेशने विनियोगः ॥ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता
त्वं च धारय मां देवि पवित्रं चासनं कुरु ॥ इति मंत्रेण आसनोपवेशनं ॥
अथ प्रातसंध्योपासनप्रयोगः ॥ आचम्य प्राणायामत्रयं कृत्वा ॥ देशकालौ
संकीर्त्य मम उपात्तदुरितक्षयद्वारा श्री परमेश्वरप्रीत्यर्थं प्रातः संध्योपासनमहं करिष्ये ॥
इति संकल्प्य ॥ आचमनं ॥ ॐ भूः ॥ अंगुष्ठाभ्यां नमः ॥ ॐ भुवः तर्जनीभ्यां न
मः ॥ ॐ स्वः मध्यमाभ्यां नमः ॥ ॐ तत्सवितुर्वरेण्यं अनामिकाभ्यां न

Indira Gandhi National Centre for the Arts

॥८३॥ मः॥ॐ भर्गोदेवस्य धीमहि कनिष्ठिकाभ्यां नमः॥ॐ धियो यो नः प्रचो
दयात्॥ करतलकरपृष्ठाभ्यां नमः॥ॐ भूर्हृदयाय नमः॥इति हृति॥ॐ भु
वः शिरसे स्वाहा॥इति शिरसि॥ॐ स्वः शिखायै वषट्॥इति शिखा॥ॐ तत्स
वितुर्वरेण्यं कवचाय हुं॥इति कवचं॥ॐ भर्गो देवस्य धीमहि नेत्रत्रया
य वौषट्॥धियो यो नः प्रचोदयात्॥अस्त्राय फट्॥इति करांगन्यासः॥ॐ
कारस्य ब्रह्मा ऋषिः॥गायत्री छंदः परमात्मा देवता॥सप्तव्याहृतीनां वि
श्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः॥गा ॥८३॥
यत्र्युष्णिगनुष्टुप्बृहतीपंक्ति त्रिष्टुभगतीछंदांसि॥अग्निवायुसू

र्य बृहस्पतिवरुणेंद्रविश्वेदेवा देवताः॥तत्सवितुरिति विश्वामित्र ऋ
षिः॥गायत्री छंदः॥सविता देवता॥ॐ आपो ज्योतिरिति प्रजापति ऋ
षिः॥यजुः ब्रह्माग्निवायुसूर्या देवताः॥प्राणायामे विनियोगः॥आत्म
नः समंतात्प्रदक्षिणमुदकं प्रक्षिप्य॥प्राणायामसमाप्ति पर्यंतं नत्रमुख
निमीलनपूर्वकं मौनं कृत्वा कनिष्ठिकानामिकाभ्यां वामनासिकां नि
रुध्य दक्षिणनासिकया शनैः शनैर्वायुं पूरयन् स्वनाभिपद्मे रक्तवर्णं चतु
र्मुखं ब्रह्माणं ध्यायेत्॥इति पूरकः॥अंगुष्ठकनिष्ठिकाभ्यां नासिकाद्वयं नि
रुध्य नं वायुं संभयित्वा स्वहृत्पद्मे नीलोत्पलदलश्यामं विष्णुं ध्यायन्

Indira Gandhi National
Centre for the Arts

॥८४॥ दशप्रणवसहितं गायत्रीमंत्रं त्रिवारं पठेत्॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ
महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥
धियो यो नः प्रचोदयात्॥ ॐ मापो ज्योतीरसोमृतं ब्रह्म भूर्भुवः स्वरो
॥ इति कुंभकः॥ अंगुष्ठेन दक्षिणनासिकां दृढं रोधयित्वा कनिष्ठिका
नामिकेकिंचित् शिथिलीकृत्वा वामनासिकया एकदेशेन शनैर्वेगरहितं
शरीरमकंपयित्वा वा पुरेचयन् स्वललाटे शुद्धस्फटिकश्वेतं त्रिनेत्रं त्रि
शूलं ... चिंतयेत्॥ इति रेचकः॥ इत्येकः प्राणायामः॥ पुनः पूर्ववद्ब्रह्मध्या ॥८॥
नादिपूरकानुष्ठानप्रकारं मनसि निधाय वामनासिकया शनैः शनैर्वायुं पू

रयेत्॥ इति पूरकः॥ पूर्ववद्देवविष्णुध्यानादिकुंभकानुष्ठानप्रकारं
मनसि निधायं तं वायुं पूर्णकुंभवत्॥ सम्यक् स्तंभयित्वा दशप्रणवसहितं
गायत्रीमंत्रं त्रिवारं पठेत्॥ ॐ भूः० स्वरों॥ इति कुंभकः॥ पूर्ववद्देवशिव
ध्यानादिरेचकानुष्ठानप्रकारं मनसि निधाय मध्ये पुटं धृत्वा दक्षिणनासि
कया शनैरतिमंदं वायुं नू ...रेचयेत्॥ इति रेचकः॥ इति द्वितीयः प्राणा
यामः॥ एवमेव वैपरीत्येन तृतीयोपि दक्षिणनासिकयैव वायुपूरणादि
वैपूर्ववत्पूरके॥ तद्वायुस्तंभनादि सर्वं पूर्ववद्देवकुंभके वामनासिकया
स्तंभितं वायुरेचनादि सर्वं पूर्ववद्रेचके॥ इति तृतीयः प्राणायामः॥

Indira Gandhi National Centre for the Arts

एवन्नवधाव्यावृत्य सूर्यार्घत्रयं दद्यात्॥ तद्यथा॥ ॐकारस्य ब्रह्मा ऋषिः॥
॥८५॥ गायत्री छंदः॥ परमात्मा देवता॥ भूर्भुवः स्वरिति सप्तर्णां प्रजापति ऋ
षिर्गायत्र्युष्णिगनुष्टुप् छंदांसि अग्निवायुसूर्या देवताः॥ तत्सवितुरिति
॥विश्वामित्र ऋषिर्गायत्री छंदः सविता देवता सूर्यार्घदाने विनियोगः॥
॥ ॐ भूर्भुवः स्वः तत्सवि० दयात्॥ सूर्याभिमुखो भूत्वा तिष्ठन् सपुष्पं जलं गोशृंगमा
त्रं॥ ऊर्ध्वं प्रक्षिपेत्॥ एवं मंत्रेण द्वितीयं॥ तथा मंत्रेण तृतीयं॥ दोषापेतु समोहत्वापू
र्येदुद्रुतांजलीन्॥ शृंगमात्रसमुद्गस जलमध्ये जलं क्षिपेत्॥ उद्वयमिति प्रस्कण्व ऋषिः
अनुष्टुप् छंदः सूर्यो देवता॥ उदुत्यमिति प्रस्कण्व ऋषिः। गायत्री छंदः सूर्यो देवता॥ चित्रं

देवानामिति कुत्सांगिरस ऋषिः त्रिष्टुप् छंदः। सूर्यो देवता॥ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिः उ
ष्णिक् छंदः॥ सूर्यो देवता सूर्योपस्थाने विनियोगः॥ ॐकारस्य ब्रह्मा ऋषिः॥ गायत्री छंदः॥ पर
मात्मा देवता॥ भूर्भुवः स्वरिति प्रजापति ऋषिः॥ गायत्र्युष्णिगनुष्टुप् छंदांसि॥ अग्निवायु
सूर्या देवता॥ तत्सवितुरिति विश्वामित्र ऋषिः॥ गायत्री छंदः॥ सविता देवता॥ सूर्योपस्थाने वि
नियोगः॥ तिष्ठन् हस्तस्वर प्रदर्शन पूर्वकं हस्ताभ्यां स्वस्तिकं कृत्वा॥ उपांशु सूर्योपस्थानं कुर्यात्॥
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥ उदुत्यं जात
वेदसं० सूर्यम्॥२॥ चित्रं देवाना० स्यु पश्च॥३॥ तच्चक्षुर्देवहितं० शतात्॥४॥ हस्तस्वरप्रदर्श
नपूर्वकं करमालयैव संख्यां कुर्वन् उपांशु॥ ओष्ठचालने दंतप्रकाशन वर्जं क्राग्रचित्तं स्थाप

Indira Gandhi National Centre for the Arts

थमं प्रणवमुच्चार्यनमिसमीपे हस्तां कृत्वा एकप्रणवामेव गायत्री
॥८६॥ जपेत्॥ ग्रहस्थः ब्रह्मचारिणा अंते प्रणवनिषेधात्॥ ॐ भूर्भुवः
स्वः तत्स॰ दयात्॥ यथाशक्ति गायत्री पैःजे॥ अनेनाष्टोत्तरशतसं
ख्याकेन गायत्री जपेन प्रातःसंध्यांगभूतेन श्रीभगवान्ब्रह्म
पी सविता प्रीयतां न मम॥ यदक्षरं पदभ्रष्टं मात्राहीनन्तु यद्भवेत्। त
त्सर्वं क्षम्यतां देवि कश्यपप्रिय नादिनि॥ ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ दे
वि यथासुखं॥ इत्युदकप्रक्षेपः॥ हरिहरस्य उपनयनप्रयोगानुसारे ॥८६॥
अभिवादनं॥ ॐ काश्यपस गोत्रः काश्यप अवत्सार नैध्रुवेति त्रिप्र

वरान्वित यजुर्वेदांतर्गत वाजसनेय्यंतर्गत माध्यंदिनी शाखा
ध्यायी देवदत्तशर्मा हं भो३ श्री वैश्वानर अभिवादयामि॥ इत्यु
क्त्वा दक्षिणहस्तेन दक्षिणं कर्णं वामेन वामं कर्णं स्पृष्ट्वा शिरोव
नमनं॥ एवमेव गोत्रोच्चारादिमंत्रमुच्चार्य भो३ वरुण अभिवा
दयामि॥ एवमेव गोत्रोच्चारादिमंत्रमुच्चार्य नो३ आचार्य। अ
भिवादयामि॥ एवमेव गोत्रोच्चारादिमंत्रमुच्चार्य भो३ सूर्य अ
भिवादयामि॥ ततो अन्यान्नभिवादयेत्॥ आचम्य॥ इति

Indira Gandhi National
Centre for the Arts

स्नादीनेपिकानामदेवाह्निकानुसारीप्रतःसंध्योपासनप्रयो
॥९१॥ गः॥सूत्रोक्तकर्मणोपिप्रत्यवायो भविष्यति॥अतःकारणात्
कार्यांतरवशेन एतत्प्रयोगापेक्षयाप्यन्यूनं संध्योपासनं कर्तव्यं
चेत्॥तद्यथा॥आचमनप्राणायामत्रयंअर्घउपस्थानांतं
अवश्यकर्तव्यं॥कतः॥बहुव्यवास्वगृह्योक्तं यस्यवातप्र
कीर्तितं॥तस्यतावति शास्त्रार्थे कृतेसर्वःकृतोभवेत्॥इति॥९१॥
स्मृतेः॥गद्यासंगतकारः॥यःस्वशाखोक्तमुत्सृज्यपरशा

खोक्तमाश्रयेत्॥अप्रमाणमृषिं कृत्वा सोंधेतमसि मज्जति॥अयमे
वसूत्रोक्तक्रमो हरिहरपद्धतौ ब्रह्मयज्ञात्पूर्वं आचमनं विहायउक्तः॥
तेषांमतेआचमनेनसंध्यांगं नभवति॥दीपिकाकारमतेन आचमनं
संध्यांगभूतमेव॥एतत्प्रयोगापेक्षया अधिकमनुष्ठानमपेक्षितंचे
त्॥हरिहरपद्धत्यनुसारेणकर्तव्यं॥एतेपेक्षयाप्यधिकमनुष्ठानंस्या
संध्यानादिकमपेक्षितंचेत्॥नामदेवाह्निकादौ द्रष्टव्यं॥ ॥इतिसंध्यो
पासनोपयोगी विचारः॥अग्निहोत्रमध्येमे॥स्मार्ताग्निधारणाश्री
पासनपर्यं
ता॥अग्निधारणं च संध्यावत् नित्यं यस्य कुले त्रिपुरुषपर्यं

तं वे दोज ग्नि होत्रं च नास्ति तस्य ब्राह्मण्यं संदिग्धं वैदिकांत्र

॥९८॥ यानुसारेण देवपूजादिकं कुर्यात् ॥ अथ गृहदेव पूजा ॥ दद्यात्पुरुषसू

क्तेन यः पुष्पाण्यप एव वा ॥ अर्चितं स्याज्जगदिदं तेन सर्वं चराचरं ॥ इ

ति नागदेवाह्निके ॥ श्री परमेश्वर प्रीत्यर्थं यथामीलितोपचारैः परे

श्वर पूजमहं करिष्ये ॥ सहस्रशीर्षेति नारायण ऋषिः पंचनुष्टुप् अंत्या

त्रिष्टुप् पुरुषो देवता पूजायां विनियोगः ॥ तत आत्मनो वामभागे पूजाक

लशं ॥ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधु कावेरि जलेऽस्मि ॥९८

न्सन्निधिं कुरु ॥ इति कलशे तीर्थान्यावाह्य गंधादिभिः पूजयेत् ॥ आ

त्मनो दक्षिणे शंखं प्रक्षालिताधारपात्रे विन्यस्य जलेन पूरयित्वा ॥ ॐ अ

ग्निऋषिः पवमानः पांचजन्यः पुरोहितः ॥ मीमहे महागयं ॥ इति चंदनादिना शं

खं पूजयेत् ॥ मपि पूजयेत् ॥ रेवशेस्यो न्करतः पाद्यार्घाचमनीयपात्राणि

राज लानि पूजितानि स्थापयेत् ॥ पुरुषसूक्तेन प्रत्यृचं न्यासा नागदेवाह्निकेद्र

ष्टव्याः ॥ यथा आराध्यं ध्यात्वा पुरुषसूक्तेन पूजां कुर्यात् ॥ ॐ सहस्रशीर्षा०

ऽऽनं ॥ आवाहयामि ॥१॥ ॐ पुरुष एवे० इति ॥ आसनं समर्पयामि ॥२॥ ॐ एता

वानस्य० दिवि ॥ पाद्यं समर्पयामि ॥३॥ ॐ त्रिपादूर्ध्व० अभि ॥ अर्घं समर्पया

मि ॥४॥ ॐ ततो विराडजायत० परः ॥ आचमनं समर्पयामि ॥५॥ अभ्यंग

Indira Gandhi National
Centre for the Arts

पंचामृताद्युद्वर्तनं॥ तत स्नानपात्रस्थितस द्वारका चक्रं शालिग्रामा
॥८९॥ दि प्रतिमायां चंदनलस्यो समर्प्य गलित घंटः शंखवादकेन॥ ॐ तस्मा
द्यज्ञात्सर्वहुतः संभृतं॰ श्चये॥ इति पयेत॥ चरणोदकं तक्षण॥ चंदन
तुलसीचक्रं शंखं चविमलोदके॥ घंटानदः शिलाताम्रमष्ठभिश्चरणोद
आचमनीयं समर्पयामि॥ ॐ तस्माद्यज्ञात्सर्वहुत ऋचः सा॰ यत॥
वस्त्रं समर्पयामि॥ ॐ तस्माद॰ श्चा॰ वयः॥ यज्ञोपवितं समर्पयामि॥८॥
ॐ तं यज्ञं ब॰ ये॥ गंधं समर्पयामि॥ ९॥ ॐ पुरुषं॰ च्येते॥ पुष्पं॥ १०॥ ब्राह्मणो॥ ८॥
स्य॰ यत॥ धूपं॥ ११॥ ॐ चंद्रमामनसो॰ यत॥ दीपं॥ १२॥ ॐ नाभ्या आसी॰

यन्॥ नैवेद्यं॥ १३॥ ॐ यत्पुरुषेण॰ द्ध विः॥ प्रदक्षिणात्रयं कार्यं॥ १४॥ ॐ सप्ता
स्यासन्प रि॰ पशुं॥ नमस्कारा॥ १५॥ इंद्रादि देवास्तव देवसेना विधौ नशक्ताय
८३ तय श्चोक्ताः॥ तत्राधिकारी विषयानुसारी नरः कथं स्यान्मलमूत्रधारी॥ इतिप्रा
र्थना॥ अंयज्ञेनयज्ञंदेवाः॥ उद्वासनं॥ १६॥ नैः षोडशचैनसह स्रशीर्षेत्यादिना
कुर्वीत॥ इदं पूजनं प्रातः काले कार्यं॥ अथवा प्रातर्निर्माल्यापसरणमात्रं कृत्वा
मा मध्याह्ने कार्यं॥ निर्णयसिंधौ पंचायतन संनिवेशमाह॥ बोपदेवः॥ पदार्थश्च॥ शंभो
मध्यगते हरीनहरभूद्देव्यो हरो शंकरे भास्येनागसुता रवौ हरगणेशाजां बीकास्यापि
ताः॥ देव्यां विष्णुहरेभवक्त्र रवयो लंबोदरे जेश्वरे नाबाः शंकरभागतो निसुखदा व्यस्तास्तु

॥आ०॥ हनिप्रदाः॥शंकरभागतः ईशानकोणादारभ्यप्रदक्षिणमित्यर्थः॥ ॥इतियजुर्वल्लभेगृह
॥९०॥ देवपूजा॥ ॥दक्षः॥ देवकार्यंततःकुर्यात्गुरुमंगलवीक्षणं॥मनुः॥देवतानामभि
गच्छेच्च धार्मिकांश्चद्विजोत्तमान्॥ ईश्वरंचैवरक्षार्थंगुरूनेवचपर्व
सु॥यमः॥यतीनांदर्शनंचैवस्पर्शनंभाषणंतथा॥कुर्वाणःपुण्यमाप्नोति
स्यात्तस्मात्पश्यत्तुनित्यशः॥ वामनपुराणे॥अश्वत्थवृक्षंतुसमालभेतन
श्चकुर्यान्निजजातिधर्मान्॥देशानुशिष्टंकुलधर्ममग्र्यंस्वगोत्रध
र्मंनहिसंत्यजेच्च॥उक्ताधिकारिवैन्यतमःश्राद्धाभक्तिपूर्वकंकुर्यात्॥
तदुक्तंबृहन्नारदीये॥श्रद्धापूर्वास्तुवैधर्मामनोरथफलप्रदाःश्रद्धया

नीः

साध्यतेसर्वंश्रद्धयातुष्यतेहरिः॥यत्किंचित्कुरुतेकर्मश्रद्धयाप्यणुमात्र
कंतन्महज्जायतेपुंसांशाश्वतप्रीतिदायकं॥यथासमस्तलोकानांजीवनंसलि
लंस्मृतं॥तथासमस्तसिद्धीनांजीवनंभक्तिरिष्यते॥नदानैर्नतपोभिर्वायज्ञैर्वाब
हुदक्षिणैः॥भक्तिहीनैर्मुनिश्रेष्ठतुष्यतेभगवान्हरिः॥अश्वमेधसहस्रंवा
कर्मवेदोदितंकृतं॥तत्सर्वंनिःफलंब्रह्मन्यतोभक्तिविवर्जितं॥भक्त्यायुक्तो
भवनस्यसदासंनिहितोहरिरिति॥एवमुक्तांभक्तिंदशविधेत्युक्तंतत्रैव॥सा
त्विकराजसतामसादिभेदेनदशधाविधा॥विधिबध्यार्चयेद्यस्तुदासवच्चक्र
पाणिनं॥भक्तीनांप्रवरासैयासाभक्तिःसात्विकोत्तमा॥नारायणस्यम

Indira Gandhi National
Centre for the Arts

॥ ५॥ हिमां किंचिच्छ्रुत्वा तु यो नरः॥ तत्प्रयत्नेन संतुष्टः सा भक्तिश्चोत्त
मोत्तमा॥ अन्यच्च॥ अहमेव परो विष्णुर्मयि सर्वमिदं जगत्॥ इति
यः सततं पश्येत्तं विद्यादुत्तममिति॥ एवं द्विविभक्तिः संसारच्छेदकामिका॥
रिणी॥ तत्रापि सात्त्विकी भक्तिः कार्याजना सर्वकामफलप्रदा॥ तस्माद्गु
णुषप्रतापात्संसारच्छेदनिश्चित्ता॥ स्वकर्मणोऽविरोधेन भक्तिकार्या जनार्द
दने॥ यः स्वकर्मपरित्यज्य भक्तिमात्रेण जीवति॥ तत्तस्य तुष्यते विष्णुराचारात्प
ज्यते यतः॥ सर्वागमानामाचारः प्रथमं परिकल्प्यते॥ आचारप्रभवो धर्मो ध
र्मस्य प्रभुरच्युतः॥ तस्मात्कुर्याद्धरौ भक्तिः स्वस्वकर्माविरोधिनी॥

सदाचारविहीनानां धर्मा अप्यसुखप्रदाः॥ त्वया महीशाय दृष्टं तत्सर्वं गदितं म
या॥ तस्माद्धर्मपरो भूत्वा सुखी भव दृढव्रत॥ पूजयेत्स्वप्रयत्नेन नारायणमनामयं॥ य
स्मिन्संपूज्यमाने तु सर्वकामानवाप्स्यसीति॥ ॥इति भक्तिप्रशंसा॥ एवमुक्तो भक्तिर्ह
रिहरयोर्भेदबुद्धिमकृत्वा कुर्यात्॥ अन्यथा दोषस्मरणात्॥ तथा चोक्तं तत्रैव॥ शिव
एव हरिः साक्षात्॥ हरिरेव शिवः स्वयं॥ तयोरंतरकृद्याति नरकान्कोटिकोटिशः॥
हरिरूपधरं लिंगं लिंगरूपधरो हरिः॥ ईषदप्यंतरं नास्ति भेदकृत्पापमश्नुते॥ अनादि
घने देवो हरिशंकरसंज्ञिते॥ अज्ञानसागरे मग्ना भेदं कुर्वंति पापिनः॥ यो देवो जगता
मीशः कारणानां च कारणं॥ युगांते जगदस्येत त्वरुद्ररूपधरो व्ययः॥ रुद्रो वै विष्णु

Indira Gandhi National
Centre for the Arts

पेणपालयसखिलं जगत्। ब्रह्मरूपेणसृजतिरक्षत्येवस्वयंहरिः हरिश्च
॥८२॥ करयोर्मध्येब्रह्मणश्चापियोनरः॥भेदकृन्नरकंभुंक्तेयावदाचंद्रतारकं॥
राम हरिंहरंविधातारंयःपश्यदेकरूपिणं॥सयातिपरमानंदंशास्त्राणांमे
निर्णयः॥अभेददर्शीलोदेवेशेनारायणशिवात्मके॥संबंधोब्राह्मणो
नित्येअस्माभिः किमुतोत्तमइति॥अत्रमत्स्यपरिशिष्टे॥अथगृहस्थो
त्वहरहरिशान्देवानिष्ट्वाभीश्वरर्थोन्नचिनोति॥यत्किंचित्रनिसदानंक
र्तव्यं॥इति अष्टधाविभक्तस्यग्रंथस्यप्रथमभागःसं॥अथवेदाभ्यासः॥सां ॥८२॥
गवेदाध्ययनंकृत्वार्थंविचार्यकर्मकांडप्रयोगाध्ययनंकृत्वा॥ राम

नंकृत्वामन्वादिधर्मशास्त्रंसम्यगभ्यस्यज्ञात्वाउपनिषद्भगवद्गीतादिब्रह्म
विद्यांसंपाद्यात्मज्ञानसंपादयेत्॥एवंशास्त्रेणोपनिषद्गीतांविष्णोर्ना
मसहस्रकं॥श्रीरुद्रंचैवगायत्रींनित्यमावर्तयेद्बुधः॥वेदस्वीकरणं
पूर्वंविचारोभ्यसनंजपः॥तदानंचैवशिष्येभ्योवेदाभ्यासोहिपंचधा॥स्व
वकर्मसुप्राप्यश्चित्तार्थंपरमपुरुषार्थंमोक्षसाधनार्थंचब्रह्मैवाहमस्मी
तिब्रह्मज्ञानंसंपादयेत्॥संसारेउदमेनश्रेष्ठं॥एतेषांअध्ययनाध्यापनादिकं
चब्राह्मणस्य

Indira Gandhi National
Centre for the Arts

पैणपालयसखिलं जगत। ब्रह्मरूपेणसतिरक्षसेवस्वयंहरिःहरिरी
॥८२॥ राम करयोर्मध्येब्रह्मणआपियोनरः॥भेदकृन्नरकंभुंक्तेयावदाचंद्रतारकं॥
हरिहरंविधातारंयःपश्यदेकरूपिणं॥सयातिपरमानंदंशास्त्राणामे
निर्णयः॥अभेदशीलोदेवेशीनारायणशिलात्मके॥संबंधोब्राह्मणो
नित्यंअस्माभिःकिमुतोत्तमइति॥अत्रग्रंथपरिशिष्टं॥अथगृहस्थो
त्पहरहरिश्चान्नदेवानिष्टाभीष्टानर्थान्नचिनोति॥यःकिंचित्नित्यदानंक
र्तव्यं॥इतिअष्टधाविभक्तस्यग्रंथस्यप्रथमभागकसं॥अथवेदाभ्यासः॥सां ॥८२॥
गवेदाध्ययनंकृत्वार्थंविचार्यकर्मकांडप्रयोगाध्ययनं[illegible]॥ राम

तंकृत्वामन्वादिधर्मशास्त्रंसम्यगाज्ञात्वाउपनिषद्गवद्गीतादिब्रह्म।
विद्यांसंपाद्यआत्मज्ञानंसंपादयेत्॥एवंशास्त्रेनोपनिषद्गीतांविष्णोर्ना
मसहस्त्रकं॥श्रीरुद्रंचैवगायत्रींनित्यमावर्तयेद्गृही॥वेदस्वीकरणं
पूर्वविचारोभ्यसनंजपः॥तदानंचैवशिष्येभ्योवेदाभ्यासोहिपंचधा॥स्
वकर्मसुप्रायश्चित्तार्थंपरमपुरुषार्थमोक्षसाधनार्थंचब्रह्मेवाहमस्मी
तिब्रह्मज्ञानंसंपादयेत॥संमारे३दमेनश्रेष्ठं॥एतेषांअध्ययअध्यापनादिकं
चब्राह्मणस्य

१३ २५८

बनारससंस्कृतकालेज अभिनवसंग्रहे
नं. ८८ सदाचारप्रशंसा

SARASVATI BHAVANA BENARES ... GOVT. SANSKRIT COLLEGE

Indira Gandhi National Centre for the Arts